दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणशुक्लनवमी
भाद्रपद 05 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-11 ■ वर्ष-5 ■ अङ्क-302 | 1 | अगस्त 21, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com


1 मणिमहेश-यात्रायां अस्मिन्क्रमे स्वजनैः सह सम्बद्धाः स्थास्यन्ति भक्ताः, प्रशासनेन कृता महती व्यवस्था

3 खाद्यपदार्थानाम्, इन्धनस्य अन्य-उत्पादन-सामग्रीणां च वर्धमान-मूल्यैः व्यापक-मुद्रास्फीतेः सङ्कटः - भारतीय-रिज़र्व-बैङ्क-शासकः

9 पद्मविभूषण डॉ. आदित्यनाथझामहोदयस्य व्यक्तित्वं कृतित्वं च(जयन्तीविशेषः)


## भारत-जापान-देशाभ्यां रक्षा-सहभागिता दृढीकर्तुं सहमतिः प्रकटिता , उभावपि देशौ सामुद्रिक-सुरक्षा-सहयोगाय च व्यवस्था-सम्मति-पत्रे हस्ताक्षरम् कृतवन्तौ



नवदेहल्यां भारत-जापान-रक्षामन्त्रि-स्तरीयोपवेशनं सम्पन्नम्। अस्योपवेशनस्य सहाध्यक्षतां भारतस्य रक्षामन्त्री राजनाथ सिंहः अथ च तस्य जापानी समकक्षीयः शिञ्जीरो कोइजुमी अकुर्वताम्। अस्मिन् उपवेशने सामुद्रिक-सुरक्षायाः सुदृढीकरणं, मेक इन इण्डिया इत्यस्यान्तर्गतं रक्षा-प्रौद्योगिक्याः, सहैव रणनीतिक-विश्वासस्य च विस्तारः इति प्रमुख-विषयेषु गभीरा चर्चा सञ्जाता। उभौ मन्त्रिणौ सामुद्रिक-सुरक्षा-सहयोगाय एकस्मिन् व्यवस्था-ज्ञापनसन्धौ हस्ताक्षरम् अकुरुताम्। स्वकीये भाषणे रक्षामन्त्री राजनाथ सिंहः प्रावोचत् यत् एशिया-महाद्वीपस्य द्वौ लोकतान्त्रिक-देशौ भारत-जापानौ, क्षेत्रे शान्तिं, स्थिरतां, समृद्धिं च स्थापयितुं महत्तरम् उत्तरदायित्वं निर्वहतः । श्रीसिंहः प्रतिपादितवान् यत् सामुद्रिक-मार्ग-सुरक्षायां समाह्वानानि वर्धन्ते, अतः नौपरिवहन-स्वातन्त्र्यं, वायुयान-सञ्चालन-स्वातन्त्र्यं, अथ च अबाधित-वैध-वाणिज्यं सुनिश्चेतुं क्रियमाणाः प्रयासाः केवलम् आर्थिक-आवश्यकता एव न अपितु एकम् अनिवार्यं रणनीतिक दायित्वम् अपि अस्ति। सः प्रतिपादितवान् यत् हिन्द-महासागरस्य प्रशान्त महासागरस्य च सुरक्षा परस्परं दृढतया संलग्ना वर्तते। मन्त्रिणा स्पष्टीकृतं यत् भारतस्य महासागरीय-दृष्टौ सहैव जापानस्य मुक्त-एवं-प्रकट-हिन्द-प्रशान्त-उपक्रमे च निकट-समन्वयः सम्प्रति पूर्वस्मादपि अधिकं आवश्यकं जातम्। जापानी-रक्षामन्त्री कोइजुमी-महोदयः कुमामोटो-प्रान्ते आगतेन भूकम्पेन प्रभावितान् जनानालक्ष्य भारतेन प्रकटीकृतां संवेदनां प्रशंसितवान्। सः जापानी-सामुद्रिक-आत्मरक्षा-बलस्य पोते दुरापन्नायां आपत्कालीन चिकित्सा-स्थितौ भारतीय नौसेनायाः साहायतायै कार्तज्ञं प्राकटयत्। अस्य वर्षस्य जुलाई-मासे द्वयोः देशयोः शीर्ष नेतृभ्यां निस्सारितस्य संयुक्त-वक्तव्यस्य स्मरणं कुर्वन्तौ, द्वावपि मन्त्रिणौ मुक्त-तथा-प्रकट-हिन्द-प्रशान्त क्षेत्रस्य निर्माणाय रक्षा-सहयोगं सुदृढीकर्तुं स्वसङ्कल्पं पुनरुच्चारितवन्तौ ।

## गृहमन्त्री अमितशाहः अन्ताराज्यिक विवादान् सुरक्षा-विकास-विषयाञ्च चर्चयितुं तमिलनाडु-राज्यस्य कोवलम्-नगरे एकत्रिंशत्तमस्य दक्षिण-क्षेत्रीय-परिषदुवेशनस्य अध्यक्षताम् अकरोत्



चेन्नै-नगरस्य समीपे महाबलीपुरम्-नगरे केन्द्रीय गृहमन्त्रिणः अमितशाहस्य अध्यक्षतायां एकत्रिंशत्तमं दक्षिण-क्षेत्रीय-परिषदुपवेशनं सम्पन्नम्। अस्मिन् उपवेशने मुख्यमन्त्रिणः उच्चाधिकारिणश्च क्षेत्रस्य प्रगति-विकास-सम्बद्धेषु विषयेषु विस्तृतरूपेण विचार-विमर्शम् अकुर्वन्। उपवेशने तमिलनाडु-राज्यस्य मुख्यमन्त्री जोसेफ विजयः, कर्णाटकस्य मुख्यमन्त्री डी.के. शिवकुमारः, केरलस्य मुख्यमन्त्री सतीशनः, तेलङ्गानायाः उप-मुख्यमन्त्री मल्लू भट्टी विक्रमार्कः, सहैव आन्ध्रप्रदेशस्य मुख्यमन्त्री चन्द्रबाबू नायडू इत्येते भागम् अगृह्णन्। एतैः सह पुदुच्चेरी-राज्यस्य उप-राज्यपालः, अण्डमान-निकोबार द्वीपसमूहस्य उप-राज्यपालः, लक्षद्वीपस्य प्रशासकः, अथ च विविध मन्त्रालयानां वरिष्ठाधिकारिणः अपि उपस्थिताः आसन्। उपवेशने उपस्थिताः सदस्याः स्वास्थ्य-निधि-वितरणं, आधारभूत संरचना, पर्यावरण संरक्षणं, अथ च क्षेत्रीय-सुरक्षा-सम्बद्धेषु विषयेषु सहकारि-सङ्घीयतायाः महत्त्वे बलं दत्तवन्तः। अस्मिन् उपवेशने बहुषु महत्त्वपूर्ण-विषयेषु गभीरा चर्चा अभवत्, उपवेशनस्य परिणामेषु प्रतिभागिनः स्वकीय-सञ्चार-माध्यमेषु सन्तोषं प्राकटयन्।

## अद्यतनीयं सुभाषितम्

**न कस्यचित्कश्चिदिह स्वभावाद्भवत्युदारोऽभिमतः खलो वा।**
**लोके गुरुत्वं विपरीततां वा, स्वचेष्टितान्येव नरं नयन्ति॥**
**(हितोपदेशः सुहृद्भेदः- ४६)**

भावार्थः:- इस संसार में कोई किसी के लिए स्वभाव से अर्थात् जन्म से श्रेष्ठ अथवा निकृष्ट नहीं होता है; परन्तु मनुष्य को अपने कर्म ही श्रेष्ठता अथवा निकृष्टता तक पहुंचाते हैं।


हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा


## वन्दे मातरम् इति राष्ट्रिय-गीतस्य सम्पूर्ण-गानस्य स्थाने केवलं पद्य-द्वयस्य गान-सन्दर्भ काङ्ग्रेस-कार्यसमित्याः निर्णयस्य तीव्रां निन्दां कृतवान् अमितशाहः



केन्द्रीय-गृहमन्त्री अमितशाहः वन्दे मातरम् इति राष्ट्रिय-गीतस्य सम्पूर्ण-गानस्य स्थाने केवलं पद्य-द्वयस्य गान-सन्दर्भ काङ्ग्रेस-कार्यसमित्याः निर्णयस्य तीव्रां निन्दां कृतवान्। वार्ताहरैः सह संलपन् श्रीशाहः अकथयत् यत् एषः निर्णयः संसदा निर्मितस्य विधेः प्रत्यक्षम् उल्लङ्घनं अथ च राष्ट्र-विरोधि-कृत्यं वर्तते। गृहमन्त्री प्रतिपादितवान् यत् सप्तत्रिंशदधिक-एकोनविंशति-शततमे वर्षे काङ्ग्रेस-पक्षेण तुष्टीकरणार्थं वन्दे मातरम्-गीतं भाग-द्वये विभक्तम् । श्रीशाहः आरोपितवान् यत् राहुल-गान्धिनः नेतृत्वे काङ्ग्रेस-दलम् पुनः एकवारं तुष्टीकरणस्य मार्गम् अनुसरति।

## झारखण्ड-उच्च-न्यायालयः जेपीएससी-नियुक्तीनां खाद्य-सुरक्षा-अधिकारि-चयनस्य च निरस्तीकरण-आदेशे स्थगनादेशम् प्रायच्छत्

झारखण्ड-उच्च-न्यायालयः एकादशतः त्रयोदश-जेपीएससी सिविल सेवा परीक्षायाः अथ च खाद्य-सुरक्षा-अधिकारि-नियुक्तेः निरस्तीकरण-सम्बन्धे राज्य-सर्वकारस्य अधिसूचनायां अग्रिम-आदेश-पर्यन्तं स्थगनादेशं प्रायच्छत्। न्यायमूर्तिना दीपक-रोशनेन याचिकानां श्रवणावसरे स्पष्टीकृतं यत् विधि-प्रक्रियां नैसर्गिक न्याय-सिद्धान्तान् च उल्लङ्घ्य पूर्व नियुक्ताः अधिकारिणः पदात् निष्कासयितुं न शक्यन्ते। न्यायालयेन सर्वकारः सहैव झारखण्ड-लोकसेवा आयोगः आगामि-वादश्रवणाय सितम्बर-मासस्य पञ्चदशदिनाङ्क यावत् स्व-प्रतिवचनं दातुम् आदिष्टौ । उल्लेखनीयं वर्तते यत् सीआईडी-अन्वेषणस्य टीडीपीएल-संस्थायाः भूमिकायाश्च आधारेण सर्वकारेण २२ परीक्षाः निरस्तीकृताः ।



# जम्मू-कश्मीरस्य कठुआ-जनपदे सुरक्षा-बलैः अन्वेषण-अभियानम् प्रारब्धम्




जम्मू-कश्मीरस्य कठुआ-जनपदस्य सीमा-क्षेत्रेषु सन्दिग्ध-व्यक्तीनां गमनागमनस्य सूचनां प्राप्य सुरक्षा-बलैः सघनम् अन्वेषण-अभियानम् प्रारब्धम् । प्राप्तवार्तानुसारम् एतत् अभियानम् उधमपुर-कठुआ-सीमवर्तिषु बिलावर-क्षेत्रस्य वन-भागेषु चालितम् । स्थानीय-जनानाम् अनुसारं बुधवासरे चिरारात्रौ बिलावर-क्षेत्रस्य एकस्मिन् ग्रामे अज्ञात-व्यक्तिभिः कस्यचित् गृहस्य द्वारं शब्दापितम्। परिवार जनैः द्वारं न उद्घाटितम्, किन्तु परेद्युः प्रातः तैः दृष्टं यत् गृहे स्थापितं खाद्य द्रव्यं विलुप्तम् आसीत्। अनेन केचन अज्ञात-जनाः गृहे प्रविष्टाः इति शङ्का समुत्पन्ना ।

## पाक-अधिकृत-जम्मू-कश्मीरे प्रतिरोध-प्रदर्शनानि तीव्रीभूतानि,

### पाक-शासनतन्त्रं च जनाक्रोशेन वर्तते त्रस्तम्

पाकिस्तान-अधिकृत-जम्मू-कश्मीरे निवसन्तः जनाः सम्पूर्ण क्षेत्रे विरोधप्रदर्शनानि तीव्र कृतवन्तः। अनेन पाकिस्तानस्य शासनव्यवस्थायाः वास्तविकता पुनः प्रकाशिता। पीओजेके-इत्यस्मिन् क्षेत्रे विरोधप्रदर्शनानां विस्तारः निरन्तरं वर्धते, येन इस्लामाबादस्य तत् कथनं निरस्तं भवति यत् अशान्तिः केवलं रावलकोट्-क्षेत्रे एव सीमिता अस्ति। JAAC इत्यनया कार्यसमित्या इस्लामाबादस्य तत् कथनं निराकृत्य कथितं यत् विरोधप्रदर्शनानि अधुना सम्पूर्ण अधिकृतक्षेत्रे प्रसृतानि सन्ति। पाकिस्तानस्य शासनव्यवस्थया इतः पूर्वं पीओजेके इत्यस्मिन् क्षेत्रे एतादृशस्य व्यापकस्य विरोधस्य अनुभवः न कृतः। अशान्तेः व्यापकता भौगोलिकविस्तारश्च पाकिस्तानस्य शासनव्यवस्थायै उद्वेगस्य कारणे अभवताम्।

## भारतस्य त्रीसा जॉली अथ गायत्री गोपीचन्दः च बीडब्ल्यूएफ्-विश्वस्पर्धायाः महिलायुगलद्वन्द्वे प्रागुपान्त्यचरणे प्रविष्टवत्यौ




बैड्मिण्टन्-क्रीडायां, भारतस्य महिलायुगल-क्रीडिके त्रीसा जॉली अथ गायत्री गोपीचन्दः च नवदिल्ल्याम् आयोजितायां बीडब्ल्यूएफ्-विश्वस्पर्धायाः प्रागुपान्त्यचरणे प्रविष्टवत्यौ । भारतीययुगलेन उत्कृष्टं प्रदर्शनं कृत्वा जापानदेशस्य सप्तमक्रमाङ्कितं रिन् इवाङ्गा अथ की नाकानिशी चेत्येतयोः युगलं द्वयोः स्पर्धयोः एकविंशतिः षोडश तथा एकविंशतिः द्वादश इति अङ्कान्तरालेन पराजितम्।

# हिमाचलप्रदेशे मार्गदुर्घटनाः चण्डीगढ़- मनाली- राजमार्गस्य कन्दरायां द्वयोः भारवाहनयोः परस्परं संघट्टः; त्रयाणां जनानां मृत्युः, अष्टजनाः व्रणिताः



हिमसंस्कृतवार्ताः- कुल्लूः।चण्डीगढ़- मनाली-राष्ट्रीयराजमार्गे द्वादश- संख्याकायां कन्दरायां गुरुवासरे प्रातः द्वयोः भारवाहनयोः (ट्रक-यानयोः) सम्मुखतः भीषणः संघट्टः अभवत्। अस्यां दुर्घटनायां त्रयाणां जनानां मृत्युः अभवत्, अपि च अष्टजनाः व्रणिताः जाताः। व्रणितेषु द्वयोः स्थितिः चिन्ताजनका वर्तते। तौ उत्तमचिकित्सार्थं श्रीलालबहादुरशास्त्री-राजकीय- आयुर्विज्ञान- महाविद्यालये चिकित्सालये च (नेरचौक) प्रेषितौ स्तः। एषा दुर्घटना प्रातः प्रायः पादोन-अष्टवादने द्वादश- संख्याकायां सुरङ्गायां घटिता। प्राप्तवृत्तानुसारं पञ्जाबराज्यस्य हिमाचलस्य च भारवाहनयोः मध्ये एषः संघट्टः अभवत्। संघट्टः एतावान् भीषणः आसीत् येन द्वयोः यानयोः स्थिताः जनाः क्षतविक्षताः अभवन्। दुर्घटनायाः सूचनां प्राप्य 'औट' आरक्षकदलं तथा च अनुसन्धान-अधिकारिणः घटनास्थलम् उपस्थाय साहाय्य-रक्षणकार्यं प्रारभन्त। व्रणितान् '१०८' रुग्णवाहिकायाः साहाय्येन नगवाई-स्थिते सामुदायिक-स्वास्थ्यकेन्द्रे नीतम्। तत्र चिकित्सकाः त्रीन् जनान् मृतान् घोषितवन्तः। अन्ये व्रणिताः प्राथमिकोपचारानन्तरं नेरचौक-आयुर्विज्ञान-महाविद्यालयं कुल्लूस्थ- क्षेत्रीय-चिकित्सालयं च प्रेषिताः। तयोः द्वयोः व्रणितयोः स्थितिः गम्भीरा वर्तते इति हेतोः तौ नेरचौक-आयुर्विज्ञान-महाविद्यालयं प्रेषितौ। दुर्घटनायाः कारणं तावत् स्पष्टं नास्ति। आरक्षकदलम् अनुसन्धानं प्रारब्धवान्। पधरमण्डलस्य उप आरक्षक- अधीक्षकः लोकेन्द्रनेगी दुर्घटनां प्रमाणीकृत्य अवदत् यत् प्रकरणे नियमानुसारम् अग्रिमा कार्यवाही क्रियते, दुर्घटनायाः कारणानां च परीक्षा भवति।

# तथ्यैः सह सदनम् आगच्छेत् विपक्षः, प्रदेशस्य सम्पत्ति-लुण्ठकानां विरुद्धं भविष्यति दृढ- कार्यानुष्ठानम्- मुख्यमन्त्री सुक्खू-महोदयः



हिमसंस्कृतवार्ताः- शिमला।पूर्व-प्रधानमन्त्रिणः राजीवगान्धी-महोदयस्य द्व्यशीतितमायां जयन्त्यां शिमलायां मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः मन्त्रिमण्डलस्य सदस्यैः सह तस्मै श्रद्धाञ्जलिं समर्पितवान्। अस्मिन् अवसरे सः भारतीय-जनता-पक्षस्य (भाजपा) उपरि तीक्ष्णं प्रहारम् अकरोत्। प्रावृट्-सत्रम् अधिकृत्य मुख्यमन्त्रिणा विपक्षाय तथ्यैः सह सदनम् आगन्तुं परामर्शः दत्तः। तेन उक्तं यत् विंशति-वर्षेषु प्रथमवारं दश-दिवसानां सत्रम् आहूतम् अस्ति।

विधायकस्य डॉ. जनकराजस्य उपरि सतर्कता-अन्वेषणम् अधिकृत्य तेन स्पष्टीकृतं यत् सर्वकारः प्रतिशोध-भावनया कार्यं न करोति। प्रदेशस्य सम्पत्तिं लुण्ठतां जनानां विरुद्धं कठोर-कार्यानुष्ठानं विधास्यते। विधायकः अन्वेषणाय आहूतः अस्ति, तेन च उत्तराणि दत्त्वा तथ्यानि प्रस्तोतव्यानि। सः अवदत् यत् पुरुषाणां गर्भाशय-शल्यक्रियाः कृताः, अधुना अन्यानि अपि तथ्यानि प्रकाशम् आयान्ति। तस्मिन् समये जनकराजः 'आईजीएमसी' इत्यस्य चिकित्सा-अधीक्षकः आसीत्।

प्रश्नपत्र-प्रकटन-प्रकरणे विपक्षं लक्ष्यीकृत्य तेन उक्तं यत् काङ्ग्रेस-कार्यकारिणी-समित्याः उपवेशने पारदर्शिकतया परीक्षाणाम् आयोजनाय निर्देशाः दत्ताः सन्ति। तेन प्रश्नः कृतः यत् यदा हिमाचले प्रश्नपत्राणि प्रकटीभूतानि, तदा किं पूर्वतन- सर्वकारस्य पादेषु शृङ्खलाः बद्धाः आसन्? वर्त्तमानसर्वकारेण प्रश्नपत्र-प्रकटन-प्रकरणे कार्यानुष्ठानं कृत्वा अपराधिणः कारागारे प्रेषिताः।

## 'आउटसोर्स'- व्यवस्थायाः समाप्तिः, श्वेतपत्रस्य च उद्घोषणम्

सर्वकारः शिक्षा-चिकित्साक्षेत्रयोः बाह्यस्रोतव्यवस्थां समापयितुम् इच्छति। लोक-सेवा-आयोगे प्रथमवारं लिखितपरीक्षायाः अङ्कानां संयोजनस्य निर्णयः स्वीकृतः, सर्वकारीय-सेवायां च अनुशंसया किमपि स्थानं नास्ति। मुख्यमन्त्रिणा उक्तं यत् सर्वकारः श्वेतपत्रम् आनेष्यति, येन जनतायाः सम्मुखे सत्यम् असत्यं च पृथक् भविष्यति, तथा च ज्ञापयिष्यते यत् केन हिमाचलस्य सम्पत्तेः लुण्ठनं कृतम्। तेन विपक्षः विपक्षनेता च उक्तौ यत् विरोधं बहिर्गमनं च कुर्वन्तु, किन्तु सर्वकाराय अपि स्वपक्षप्रस्तुतये अवसरं यच्छन्तु। मुख्यमन्त्रिणा आशङ्का प्रकटीकृता यत् निर्वाचन-कारणात् सामाजिकमाध्यमेषु दृश्यमानतां रक्षितुं विपक्षः कोलाहलं कर्तुं शक्नोति।

काङ्ग्रेसकार्यकारिणीसमित्याः उपवेशनं देहलीप्रवासं चाधिकृत्य मुख्यमन्त्रिणा प्रोक्तं यत् उपवेशने विविध-विषयेषु मन्त्रणा संजाता, समितिरेव दलस्य कार्यक्रमं निर्धारयिष्यति। प्रावृट्-सत्रानन्तरं सः देहलीं गमिष्यति, केन्द्रसर्वकारस्य सम्मुखे च हिमाचलस्य अधिकाराणां विषये चर्चां करिष्यति। 'बीबीएमबी' इत्यधिकृत्य मुख्यमन्त्रिणा उक्तं यत् महत्त्वपूर्णः निर्णयः आगमिष्यति। यदि निर्णयः हिमाचलस्य पक्षे समायाति, तर्हि प्रदेशाय प्रतिवर्षं पञ्चशत-कोटि-रूप्यकाणाम् (५०० कोटि) अतिरिक्तम् आयं प्राप्स्यते।

# विपक्षस्य भूमिका भविष्यति सकारात्मक- रचनात्मिका, किन्तु प्रतिशोधभावना न सोढव्या- जयरामठाकुरः



हिमसंस्कृतवार्ताः- शिमला। पूर्वमुख्यमन्त्री विपक्षनेता च जयरामठाकुरः उक्तवान् यत् प्रावृट्-सत्रे विपक्षस्य भूमिका रचनात्मिका स्थास्यति। यदि अस्माकं पक्षाः गाम्भीर्येण स्वीक्रियन्ते तर्हि वयं सहयोगं दास्यामः, यदि च विषयान् स्थगयितुं प्रयासः भविष्यति तर्हि विपक्षः सदनस्य अन्तः बहिः च जनस्वरः भूत्वा सर्वकारं स्वपक्षस्य अङ्गीकरणाय विवशं करिष्यति।

गुरुवासरे सर्वदलीय-उपवेशनानन्तरं पूर्वमुख्यमन्त्रिणा उक्तं यत् सर्वकारेण सदनस्य गाम्भीर्यम् अवगन्तव्यम्। यदि मुख्यमन्त्री तस्य मन्त्रिणश्च समीचीनां वार्तां वदिष्यन्ति तर्हि तेषां वार्ता श्रोष्यते, यदि च लोकतन्त्रस्य स्वरं दमयितुं प्रयासः क्रियेत तर्हि विपक्षेण समुचितम् उत्तरं दास्यते। जन-स्वरः प्रभावकारी-रीत्या उद्घोषयितुं शक्येत, तदर्थं वयं पूर्णं यत्नं विधास्यामः। बहवः विषयाः सर्वकारस्य व्यवहारे आश्रिताः सन्ति। वयं जनहितस्य विषयान् न त्यक्ष्यामः।

**प्रतिशोधभावनया अभियोग-पञ्जीकरणस्य विरोधः**

गते कतिपय-काले सर्वकारेण जन-प्रतिनिधिनां विरुद्धं प्रतिशोधभावनया अभियोगान् पञ्जीकर्तुं काचित् शृङ्खला प्रारब्धा, या स्वास्थ्यावहा परम्परा नास्ति। यदि विषयाः गम्भीराः सन्ति तर्हि अन्वेषणम् अवश्यं भवेत्, किन्तु यदि भवान् चिन्तयति यत् विपक्षस्य स्वरः कथमपि दमनीयः, तर्हि वयम् एतत् न अनुमंस्यामः। तेन उक्तं यत् औपचारिक-उपवेशने विधानसभाध्यक्षस्य सम्मुखे अयम् विषयः उत्थापितः यत् गतेषु चतुर्षु वर्षेषु सर्वकारस्य व्यवहारः तादृशः अस्ति यत् यदा कोऽपि विपक्ष-सदस्यः प्रश्नं पृच्छति, तदा उच्यते यत् 'सूचना सङ्गृह्यमाणा वर्तते'। अधिकारिणः सूचनां सर्वकाराय ददति, किन्तु मन्त्रिणः मुख्यमन्त्री च जानन्त एव वदन्ति यत् सूचना सङ्गृह्यमाणा अस्ति। केचन विभागाध्यक्षाः अपि जानन्तः सूचनां गोपयन्ति। विवशाः भूत्वा अस्माभिः 'सूचनायाः अधिकार-अधिनियमस्य' आश्रयं स्वीकृत्य सैव सूचना सदने प्रस्तोतव्या भवति। सदने मुख्यमन्त्रिणः व्यवहारः समुचितः न भवति। मुख्यमन्त्री यदि समीचीनां वार्तां करिष्यति, तर्हि वयम् अवश्यं शृणुमः।

# मणिमहेश-यात्रायां अस्मिन्क्रमे स्वजनैः सह सम्बद्धाः स्थास्यन्ति भक्ताः, प्रशासनेन कृता महती व्यवस्था




हिमसंस्कृतवार्ता — चम्बा।
पवित्रायां मणिमहेश-यात्रायां अस्मिन्क्रमे आगच्छन्तः भक्ताः स्वजनैः सह निरन्तरं सम्बद्धाः स्थास्यन्ति। प्रशासनेन यात्रायाः मुख्य-विश्राम-स्थले 'धनछो'-नामके स्थाने 'भारत-सञ्चार-निगम-नियमिता' (BSNL) इत्यस्य चतुर्थ-स्तरीयः (4G) चल-दूरभाष-स्तम्भः (Mobile Tower) स्थापितः। अनेन भक्ताः चल-दूरभाष-यन्त्रेण स्व-कुशल-वार्तां स्वजनेभ्यः प्रेषयितुं शक्ष्यन्ति।

विगते वर्षे अतिवृष्टेः कारणात् मणिमहेश-मार्गे बहवः भक्ताः मध्ये एव स्थगिताः अभवन् तथा च कस्यापि दूरसञ्चार-जालस्य (Network) अभावेन अवशिष्ट-संसारात् पृथग्भूताः आसन्। अनेन भक्तानां कुटुम्बिनां चिन्ता अपि अतीव वर्धिता आसीत्। एतत्कारणात् प्रशासनेन अस्मिन्क्रमे व्यवस्थाः सुदृढाः विधातुं दूरसञ्चार-सुविधा उपकल्पिता।

उपायुक्तः चम्बा मुकेशरेपसवालः न्यवेदयत् यत् मणिमहेश-यात्रायाः कृते अन्तर्जाल-माध्यमेन पञ्जीकरण-प्रक्रिया (Online Registration) प्रचलन्ती वर्तते। यात्रा-काले भक्तेभ्यः उत्तमाः सुविधाः प्रदातुं प्रशासन-पक्षतः विविधाः व्यवस्थाः तीव्रगत्या समाप्यन्ते। उपायुक्तेन विज्ञापितं यत् भरमौर-प्रशासनेन यात्रा-मार्गे जलस्य, विद्युतस्य, मार्गस्य च सम्बद्धाः सर्वाः आवश्यकाः व्यवस्थाः २५ अगस्त पर्यन्तं पूर्णं विधातुं लक्ष्यं निर्धारितम् अस्ति। यात्रा-समये भक्तेभ्यः कस्यापि प्रकारस्य कष्टं न भवेत्, तदर्थं सम्बद्ध-विभागेभ्यः आवश्यकाः निर्देशाः दत्ताः सन्ति।

**सुरक्षिता सुगमा च यात्रा**

उपायुक्तः प्रोक्तवान् यत् अस्मिन्क्रमे यात्रा-काले दूरसञ्चार-सुविधा अपि सुदृढा कृता। धनछो-स्थाने चतुर्थ-स्तरीयः (4G) दूरसञ्चार-स्तम्भः स्थापितः वर्तते। अनेन यात्रा-मार्गे भक्तेभ्यः स्थानीय-जनेभ्यश्च चल-दूरभाष-सञ्चारस्य उत्तमा सुविधा प्राप्स्यते इति आशा अस्ति। प्रशासनस्य एष एव प्रयासः यत् मणिमहेश-यात्रायां भक्तेभ्यः सुरक्षिता सुगमा च यात्रा-सुविधा प्रदीयेत। एतदर्थं विविध-विभागानां स्तरे सज्जीकरणाय अन्तिमं रूपं दीयते।

# विधानसभा-प्रावृट्-सत्रं २०२६ अधिकृत्य शिमलायां दुर्भेद्य-सुरक्षा-व्यूहः, ७५० आरक्षकाः सम्भालिष्यन्ति दायित्वम्

हिमसंस्कृतवार्ताः- शिमला।हिमाचलप्रदेश-विधानसभायाः प्रावृट्-सत्रं २०२६ अवलोक्य राजधान्यां शिमलायां सुरक्षा-व्यवस्था पूर्णतया सुदृढा कृता वर्तते। विधानसभा-सत्रस्य समये कस्यापि अप्रिय-घटनायाः सुरक्षा-सङ्कटस्य वा निवारणाय शिमला-आरक्षकविभागेन व्यापकः सुरक्षाप्रकल्पः सज्जीकृतः। अस्य अन्तर्गतं विधानसभा-परिसरे तत्-समीपवर्ति-क्षेत्रेषु च प्रायः ७५० आरक्षकाणां सुरक्षा-बलानां च नियुक्तिः कृता अस्ति। आरक्षक-विभागेन सुरक्षया सहैव यातायातव्यवस्थां सन्दर्भ्य अपि विशिष्टा योजना सज्जीकृता, येन सत्र-काले नगरे सामान्य-जनानाम् आवागमनं बाधितं न भवेत्।

वरिष्ठ-आरक्षकाधीक्षकः शिमला गौरवसिंहः न्यवेदयत् यत् सुरक्षा-व्यवस्थां सुदृढां विधातुं विधानसभापरिसरः तत्-समीपवर्तिक्षेत्रं च सुरक्षादृष्ट्या त्रिषु मुख्यक्षेत्रेषु विभक्तम् अस्ति। एतेषां मुख्यक्षेत्राणाम् अन्तः बहूनि उप-क्षेत्राणि विरचितानि सन्ति। प्रत्येकस्य उप-क्षेत्रस्य उत्तरदायित्वम् एकस्मै राजपत्रित-आरक्षकाधिकारिणे समर्पितम्। सम्बद्धाः अधिकारिणः स्वक्षेत्रे नियुक्तानाम् आरक्षकाणां कर्तव्यस्य, निरीक्षणस्य सुरक्षा-व्यवस्थायाश्च निरन्तरं समीक्षां करिष्यन्ति।

## प्रवेश-द्वारेषु आरक्षकाणां तीक्ष्णा दृष्टिः, निशा-भ्रमण-व्यवस्था च

सत्र-काले नगरे बहिः आगच्छतां वाहनानां जनानां च आवागमने अपि तीक्ष्णा दृष्टिः स्थाप्यते। नगर-प्रवेश-मार्गेषु आरक्षकदलेन परीक्षणं वर्धितम्। शोघी, मेहली, मशोबरा- ढली, तवी मोड़- सहितेषु विविधासु प्रवेश-सीमासु आरक्षकदलानि नियुक्तानि सन्ति।

केवलं दिवाकाले एव न, अपि तु रात्रौ अपि




सुरक्षाव्यवस्थां प्रभावकारीं विधातुं नगरे निशाभ्रमणं (गश्त) तीव्रं कृतम् अस्ति। आरक्षक-दलानि संवेदनशील-क्षेत्रेषु निरन्तरं सञ्चरणं कुर्वन्ति। अनेन सहैव शिमलायाः उपाहारगृहाणां, धर्मशालानां विश्रामगृहाणां च परीक्षणं क्रियमाणम् अस्ति, येन काऽपि सन्दिग्ध-गतिविधिः समयपूर्वमेव रोद्धुं शक्येत।

## गुप्तचर-तन्त्रं सक्रियम्, यातायात-सञ्चालनाय च विशेष-योजना

विधानसभा-सत्रस्य समये सुरक्षा-व्यवस्थायां गुप्तचर-विभागस्य अपि महत्त्वपूर्णा भूमिका वर्तते। सम्भाव्य-सुरक्षा-सङ्कटान् अवलोक्य गुप्तचर-दलं निरन्तरं सूचनाः सङ्गृह्णाति। वरिष्ठ-आरक्षकाधीक्षकः अवदत् यत् सम्भाव्य-आह्वानानां सम्मुखीकरणं कर्तुं क्षेत्रस्तरे नियुक्तानाम् आरक्षकाणां वरिष्ठ- अधिकारिणां च मध्ये उत्तमः समन्वयः स्थापितः अस्ति।

सत्रकाले विशिष्ट-व्यक्तीनां सञ्चारकारणात् सामान्यवाहनानां भारः अपि वर्धते। एतदर्थं यातायात-आरक्षणक-विभागेन पृथक् रूपेण विस्तृत-सञ्चार-प्रबन्धन-योजना निर्मिता। मुख्यमार्गेषु चतुष्पथेषु च पर्याप्त- आरक्षकाः नियुक्ताः सन्ति। शिमला-आरक्षक-विभागेन सामान्य- नागरिकेभ्यः सुरक्षा-निर्देशानां पालनाय परीक्षणसमये च सहयोग-प्रदानाय प्रार्थना कृता अस्ति।




# "एआई मेट्रोसञ्चालनपरिवर्तने।"

**हिमसंस्कृतवार्ताः- रविः खरिडेहालः, बेङ्गलूरु।** एआई- प्रौद्योगिक्या मेट्रोसञ्चालनपरिवर्तनः प्रवर्त्यते। सञ्चालनपरिवर्तनेन जनसम्मर्दनियन्त्रणं विफलतापरिचयं इत्यादीनां च प्रवर्त्यन्ते। संचालनपरिवर्तनेन वास्तविकसमययात्रानुभवः सुदृढः भवति। यात्रानुभवः सुदृढः कथं भवति, अनेन एआई-प्रौद्योगिक्या वेगावधारकैः, सेवानां नियमनैः परिवर्तनशीलपरिस्थितिषु प्रतिक्रियामाणैः च यात्रानुभवः सुदृढः। ऊर्जादक्षतायां, यात्रिकस्थानस्य उपलब्धतायाः संकेतेषु सहायतां कृत्वा उपभोक्तृ- अनुभवः वर्धितः भवति। यन्त्रस्वास्थ्य केन्द्रम् अनुरक्षणार्थम् उपकरणेषु वास्तविक-समयसचेतनानि प्रदाति। सूचितसचेतनासु तत्कालं कार्याणि सेवाव्यवधानं परिहरन्ति। दुरितं न जनयितुम् उत्तमः उपयोक्तृ- अनुभवः अस्ति।

# नाभानगरे दशदिवसीय- संस्कृत- सम्भाषण- शिबिरस्य शुभारम्भः



हिमसंस्कृतवार्ताः- पञ्जाबप्रान्तस्य पटियालाविभागस्य नाभानगरे स्थिते कन्याविद्यालये दशदिवसीयस्य संस्कृत- सम्भाषणशिबिरस्य भव्यः शुभारम्भः अभवत्। अस्य शिबिरस्य उद्देशः छात्रासु संस्कृतभाषायाः प्रति रुचिं वर्धयितुम्, तासां वार्तालापकौशलं च विकसितुं वर्तते।शिबिरस्य उद्घाटनं विद्यालयस्य प्रधानाचार्यायाः अध्यक्षतायां सम्पन्नम्। कार्यक्रमे विद्यालयस्य सर्वाः शिक्षिकाः छात्राश्च उपस्थिताः आसन्। दीपप्रज्वलनेन सह वन्दना गीतेन च कार्यक्रमः आरब्धः।
शिबिरशिक्षकः जनकराजमहोदयः छात्राभ्यः संस्कृतसम्भाषणस्य महत्त्वं बोधयन् अवदत् यत् संस्कृतम् अस्माकं संस्कृतेः मूलम् अस्ति। दैनिकजीवने संस्कृतस्य प्रयोगेण वयं स्वसंस्कृतिं रक्षितुं शक्नुमः। अस्मिन् शिबिरे विंशतिः बालिकाः भागं गृह्णन्ति। प्रतिदिनं ताः विभिन्नैः खेलैः, गीतैः, संवादैः च संस्कृतं शिक्षिष्यन्ते। प्रधानाचार्यमहोदय उक्तं यत् एवंविधाः शिबिराः छात्राणां भाषाज्ञानं वर्धयन्ति। सर्वाभ्यः छात्राभ्यः संस्कृतेन वार्तालापं कर्तुं प्रेरणा प्रदत्ता।

# 'संस्कृतभाषायामुपनिबद्धं बौद्धवाङ्गयम्' विषये विशेषव्याख्यानं सम्पन्नम्



**हिमसंस्कृतवार्ताः- सत्येन्द्रपाठकः, लखनऊ।** केन्द्रीय- संस्कृत- विश्वविद्यालयस्य लखनऊपरिसरे बौद्धदर्शनविद्याशाखायाः पालि- अध्ययन- अनुसन्धानकेन्द्रस्य च संयुक्ततत्त्वावधाने संस्कृतसप्ताह- महोत्सवस्य उपलक्ष्ये 'बौद्धदर्शन- विशिष्ट- व्याख्यानमाला' अन्तर्गतं 'संस्कृतभाषायामुपनिबद्धं बौद्धवाङ्मयम्' इति विषये विशेषव्याख्यानस्य आयोजनम् आभासीयमाध्यमेन सम्पन्नम्।
कार्यक्रमे भोगीलाल- लेहरचन्द- प्राच्य- अध्ययन- संस्थानस्य, दिल्ली इत्यस्य निदेशकः प्रो. विजयकुमारजैनः मुख्यवक्तृरूपेण उपस्थितः सन् विषयमधिकृत्य विस्तृतं ज्ञानवर्धकं च व्याख्यानं प्रस्तुतवान्। प्रो. जैनः पालिसाहित्यस्य बौद्धवाङ्मयस्य च विद्वान् अस्ति तथा केन्द्रीय- संस्कृत- विश्वविद्यालयस्य लखनऊपरिसरस्य पूर्वप्राचार्यः निदेशकश्च अपि आसीत्।
स्वीयव्याख्याने प्रो. जैनः सर्वजनभाषारूपेण संस्कृतस्य स्वरूपं प्रतिपादयन् संस्कृतभाषायां विरचितस्य बौद्धसाहित्यस्य समृद्धां परम्परां, तस्य दार्शनिकं साहित्यिकं च महत्त्वं तथा भारतीयज्ञानपरम्परायाः संरक्षणे प्रसारे च तस्य भूमिकां प्रकाशयामास। सः अवदत् यत् बौद्धवाङ्मयस्य अध्ययनं केवलं धार्मिक- दार्शनिकदृष्ट्या एव न, अपि तु भारतीयभाषायाः, संस्कृतेः, बौद्धिकेतिहासस्य च अवगमनेऽपि महत्त्वपूर्णम् अस्ति।
आभासीयमाध्यमेन आयोजिते अस्मिन् व्याख्याने बौद्धदर्शनस्य, पालिभाषायाः संस्कृतस्य च विद्यार्थिनः, शोधार्थिनः अध्यापकाः च उत्साहपूर्वकं सहभागीभूताः। व्याख्यानस्य मध्ये संस्कृते उपलब्धानां बौद्धग्रन्थानां, बौद्धदार्शनिकपरम्पराणां तथा भारतीयज्ञानपरम्परायां संस्कृतबौद्धवाङ्मयस्य योगदानस्य विविधाः पक्षाः विस्तरेण चर्चिताः।
कार्यक्रमस्य समन्वयकः डॉ. प्रफुल्लगडपालः तथा सहसमन्वयकाः डॉ. कृष्णाकुमारी, डॉ. प्रदीपकुमारद्विवेदी, डॉ. जयवन्तखण्डारे, डॉ. प्रियंका च कार्यक्रमस्य सफलायोजने महत्त्वपूर्णां भूमिकां निर्वहन्तः आसन्। कार्यक्रमस्य अन्ते डॉ. अतुलकुमारश्रीवास्तवः धन्यवादज्ञापनं कृतवान्।अवसरेऽस्मिन् डॉ. प्रफुल्लगडपालेन उक्तं यत् संस्कृते पालिभाषायां च उपलब्धं बौद्धवाङ्मयं भारतीयज्ञानपरम्परायाः अमूल्या निधिः अस्ति। तस्य गहनाध्ययनेन, अनुसन्धानस्य प्रचारप्रसारस्य च माध्यमेन बौद्धदर्शनस्य तथा भारतीयस्य सांस्कृतिकदार्शनिकवैभवस्य वैश्विकस्तरे अवगमने महत्त्वपूर्णा सहायता भविष्यति। सः सर्वेभ्यः प्रतिभागिभ्यः अध्येतृभ्यश्च आभारं प्रकटयन् भविष्येऽपि बौद्धदर्शन- पालि- संस्कृताध्ययन- सम्बद्धेषु अकादमिक- कार्यक्रमेषु सक्रिय- सहभागितायाः आह्वानं कृतवान्।

# विभिन्नराज्येषु अतिवृष्टेः पूर्वसूचना, प्रचण्डवातस्य विद्युत्पातस्य च सम्भावना



**हिमसंस्कृतवार्ता, डॉ विमलेश झा, भागलपुर, बिहार** ऋतुविज्ञानविभागेन सूचितम् अस्ति यत् शुक्रवासरे पूर्वोत्तरभारतस्य राज्येषु वर्षा निरन्तरं भविष्यति। अरुणाचलप्रदेशे, असमे, मेघालये, नागालैण्डे, मणिपुरे, मिजोरमे, त्रिपुरायां च तीव्रवृष्टेः सम्भावना वर्तते। एतेषु प्रदेशेषु झंझावातस्य विद्युत्पातस्य च सम्भावना अपि अस्ति। तदतिरिक्तं उत्तराखण्डे उत्तरप्रदेशे च वर्षा भविष्यति। सम्पूर्णे देशे मानसूनवायवः पूर्णतया सक्रियाः सन्ति। अतः देशस्य अनेकप्रदेशेषु प्रचण्डवृष्टिः भवति। नद्यः नलिकाश्च जलपूरिताः सन्ति तथा च अनेके प्रदेशाः जलप्लावनस्य भयेन त्रस्ताः सन्ति। अस्मिन् मध्ये मौसमविज्ञानविभागेन अगस्तमासस्य एकविंशतिदिनाङ्कस्य कृते देशस्य अनेकप्रदेशेषु अतिवृष्टेः पूर्वसूचना प्रदत्ता अस्ति। तदनन्तरम् झञ्झावातस्य विद्युत्पातस्य च सम्भावनायाः विषये अपि सूचना प्रदत्ता अस्ति।
उत्तरभारतस्य पर्वतीयप्रदेशेषु जम्मू-कश्मीरे, लद्दाखे, उत्तराखण्डे, हिमाचलप्रदेशे च शुक्रवासरे वर्षा भविष्यति। तदतिरिक्तं पश्चिमीउत्तरप्रदेशे अपि अतिवृष्टेः पूर्वसूचना प्रदत्ता अस्ति। उत्तराखण्डस्य केषुचित् भागेषु प्रचण्डवातः विद्युत्पातश्च भवितुम् अर्हतः। हरियाणाराज्ये चण्डीगढनगरे, देहल्यां, पञ्जाबे चापि अतिवृष्टेः पूर्वसूचना प्रदत्ता अस्ति।
मध्यभारतस्य कृते मौसमविज्ञानविभागस्य पूर्वानुमानम् अनुसृत्य पश्चिमीमध्यप्रदेशे अपि प्रचण्डवृष्टिः भविष्यति। छत्तीसगढ़राज्ये पूर्वीमध्यप्रदेशे च झञ्झावातः विद्युत्पातश्च भवितुम् अर्हतः। पूर्वीमध्यप्रदेशे तथा छत्तीसगढ़ राज्ये तीव्रवृष्टेः सम्भावना अस्ति। पूर्वीमध्यप्रदेशे अत्यधिकवृष्टेः पूर्वसूचना अपि प्रदत्ता अस्ति।
अण्डमान-निकोबारद्वीपसमूहे, पश्चिमबङ्गालराज्ये, सिक्किमप्रदेशे , झारखण्डे, बिहारप्रदेशे, ओडिशायां च तीव्रवृष्टेः सम्भावना अस्ति। अण्डमानेषु निकोबारद्वीपेषु च झञ्झावातः, विद्युत्पातः तीव्रवायुवेगश्च भवितुम् अर्हन्ति। पश्चिमभारतस्य विषये मौसमविज्ञानविभागस्य कथनमस्ति यत् कोङ्कणे गोवायां च शुक्रवासरे तीव्रवृष्टिः भविष्यति। गुजरातप्रदेशे, मध्य-महाराष्ट्रे, मराठवाडाप्रदेशे, सौराष्ट्रे, कच्छप्रदेशे चापि तीव्रवृष्टेः पूर्वसूचना प्रदत्ता अस्ति।

# छात्रसंसदः नवनिर्वाचित-मन्त्रिमण्डलस्य पदग्रहण-शपथग्रहणसमारोहः हर्षोल्लासेन सम्पन्नः



**हिमसंस्कृतवार्ताः- जलग्रामः।** के. सी. ई. सोसायटी-संस्थया सञ्चालिते स्वामी- विवेकानन्द-कनिष्ठ- महाविद्यालये, जलग्रामे छात्रसंसदः नवनिर्वाचित- मन्त्रिमण्डलस्य पदग्रहण-शपथग्रहणसमारोहः हर्षोल्लासपूर्णे वातावरणे सम्पन्नः। छात्रेषु लोकतान्त्रिकमूल्यानां, नेतृत्वक्षमतायाः, निर्णयक्षमतायाः, सामाजिक-दायित्वस्य, कर्तव्यनिष्ठायाः च विकासः भवेत् इति उद्देशेन छात्रसंसदः स्थापना कृता अस्ति।

समारोहे महाविद्यालयस्य पर्यवेक्षिका प्रा. शिल्पा सरोदे अध्यक्षस्थानम् अलङ्कृतवती। अस्मिन् अवसरे कलावाणिज्यशाखायाः समन्वयकः प्रा. उमेश पाटील, प्रा. महेन्द्र राठोड, प्रा. हेमन्त पिंपळे, प्रा. प्रमोद भोई, प्रा. सन्दीप वानखेडे च शिक्षकवृन्देन सह बहवः छात्राः उपस्थिताः आसन्।

**नवनिर्वाचित-मन्त्रिमण्डलस्य घोषणा**

अस्मिन् अवसरे नवनिर्वाचितस्य छात्र- मन्त्रिमण्डलस्य पदाधिकारिणां घोषणा कृता। मुख्यमन्त्रिपदे आयुष्य गणेश चौधरी, उपमुख्यमन्त्रिपदे तनिष्का संजय वाघ, गृहमन्त्रिपदे दर्शन कमलाकर पाटील, शिक्षामन्त्रिपदे लकी बाविस्कर, क्रीडामन्त्रिपदे रिया पाटील, सांस्कृतिकमन्त्रिपदे संस्कृती पवनीकर, स्वास्थ्य-स्वच्छतामन्त्रिपदे वनिता ललित तळेले, पर्यावरणमन्त्रिपदे च तन्वी मनीष मोरे निर्वाचिताः अभवन्।

सर्वेभ्यः नवनिर्वाचितेभ्यः मन्त्रिभ्यः प्रा. शिल्पा सरोदे सामूहिकरूपेण शपथं दत्तवती। शपथग्रहणसमये छात्रैः लोकतान्त्रिकमूल्यानां संरक्षणं, महाविद्यालयस्य अनुशासनस्य प्रतिष्ठायाश्च रक्षणं, सहपाठिनां समस्याः ज्ञात्वा तासां समाधानाय प्रयत्नः तथा स्वकीयदायित्वस्य निष्ठया प्रामाणिकतया च निर्वहणम् इति संकल्पः कृतः।

**नेतृत्वेन सेवाभावस्य संस्कारः**

अवसरेऽस्मिन् मार्गदर्शकैः उक्तं यत् छात्रसंसद् केवलं पदप्रदानस्य व्यवस्था नास्ति, अपि तु छात्रेभ्यः लोकतान्त्रिकप्रक्रियायाः प्रत्यक्षानुभवं प्रदातुं समर्थं प्रभावी व्यासपीठम् अस्ति। प्राप्तं पदं अधिकारस्य न, अपि तु दायित्वस्य प्रतीकम् अस्ति। अतः प्रत्येकं मन्त्रिणा छात्रहितम्, अनुशासनं, महाविद्यालयस्य सर्वाङ्गीणविकासं प्रति विशेषं ध्यानं दातव्यम् इति आवाहनं कृतम्।

नवनिर्वाचितैः छात्रप्रतिनिधिभिः स्वमनोगतं प्रकटयद्भिः महाविद्यालयस्य शैक्षणिकेषु, सांस्कृतिकेषु, क्रीडासम्बद्धेषु, स्वच्छतासम्बद्धेषु, पर्यावरणसम्बद्धेषु च विविधेषु उपक्रमेषु सक्रियतया सहभागित्वं कृत्वा छात्रहिताय कार्यं कर्तुं संकल्पः व्यक्तः। छात्रसंसदः निर्वाचनप्रक्रिया मार्गदर्शकस्य प्रा. अर्जुन शास्त्रीमहोदयस्य, निर्वाचननिर्णयाधिकारिणः प्रा. दिनेश महाजन- महोदयस्य नेतृत्वे शिस्तबद्धतया लोकतान्त्रिकपद्धत्या च सम्पन्ना।

समारोहस्य सूत्रसञ्चालनं डॉ. अतुल इंगळे इत्यनेन कृतम्। शिक्षकवृन्दस्य मार्गदर्शने कार्यक्रमस्य सम्यक् आयोजनं कृतम्। छात्रेषु नेतृत्वक्षमतायाः, निर्णयक्षमतायाः, सद्भावनायाः, सामाजिक-दायित्वस्य च विकासं जनयितुम् आयोजितस्य अस्य उपक्रमस्य उपस्थितैः सर्वैः प्रशंसा कृता।

# जुबिली-सभागारे सञ्जाता सङ्गीत-सन्ध्या, २०० एनएसएस-स्वयंसेवकैः विकीर्णाः स्वराः
## आपद्प्रबन्धन-प्रशिक्षणावसरे
### सांस्कृतिककार्यक्रमेण स्वयंसेवकाः प्रापुः उत्साहम्




दरभङ्गा। ललितनारायणमिथिलाविश्वविद्यालयस्य (दरभङ्गा) एनएसएस-प्रकोष्ठस्य पक्षतः बिहारराज्य-आपद्प्रबन्धन-प्राधिकरणस्य सहयोगेन आयोजिते सप्तदिवसीये आवासिये 'युवा आपद्-मित्र' प्रशिक्षणशिबिरे जुबिली-सभागारे एका सङ्गीत-सन्ध्या आयोजिता। समस्तीपुरमण्डलस्य विविधमहाविद्यालयेभ्यः समागताः प्रायः २०० एनएसएस-स्वयंसेवकाः गीतैः, सङ्गीतेन, लोकनृत्यैः, कविताभिः, हास्यानुकृतिभिः (mimicry) च समग्रं वातावरणं सजीवम् अकुर्वन्।

कार्यक्रमस्य प्रारम्भः अमनकुमारझा-महोदयस्य विद्यापतिरचित-गोसावनी-गीतेन अभवत्। लक्ष्मीकुमारी मैथिली-स्वागतगीतं प्रस्तुतवती। स्वयंसेवकाः मैथिली-लोकगीतैः, देशभक्तिगीतैः, बिहारस्य मिथिलायाश्च लोकनृत्यैः, प्रेरककविताभिः, नृत्याभिनयैश्च दर्शकानां महतीं प्रशंसां करतलध्वनिञ्च प्राप्तवन्तः। एसडीआरएफ (SDRF) दलस्य एनएसएस-सहयोगिभिः अपि गीतानि प्रस्तुतानि। हास्यानुकृतिभिः हास्यप्रस्तुतिभिश्च कार्यक्रमे प्रचुरं मनोरञ्जनं संयोजितम्।

शिविरसंयोजकः डॉ. आर. एन. चौरसिया अवदत् यत् सङ्गीतं जीवनस्य महत्वपूर्णः भागः वर्तते। इदं मानसिकशान्तेः, भावनात्मक-अभिव्यक्तेः, सामाजिकसम्बन्धस्य च सशक्तं माध्यमम् अस्ति। सः अकथयत् यत् प्रशिक्षणस्य व्यस्ततायाः मध्ये ईदृशाः कार्यक्रमाः स्वयंसेवकेभ्यः नूत्नाम् ऊर्जां प्रयच्छन्ति।

कार्यक्रमस्य सञ्चालनं डॉ. प्रियङ्कराय-अक्षयकुमारझा-महोदयाभ्यां कृतम्। तौ अवदतां यत् सङ्गीतं लोकजीवनस्य, परम्पराणां, सांस्कृतिकविरासतायाश्च पीढीं प्रति पीढीं प्रापयितुम् एकं प्रभावशालि माध्यमम् अस्ति। धन्यवादज्ञापनं डॉ. शबनमकुमारी अकरोत्।

# अम्बालाछावनीस्थे श्रीदीवान- कृष्ण- किशोर- सनातन- धर्म- आदर्श- संस्कृत-महाविद्यालये व्याकरणविभागस्था सङ्गोष्ठी सुसम्पन्ना



**हिमसंस्कृतवार्ताः- डॉ.विपिनकुमारः**

अम्बालाछावनीस्थे श्रीदीवान- कृष्ण- किशोर- सनातन- धर्म- आदर्श- संस्कृत-महाविद्यालयः, शोधकेन्द्रे च पञ्चदिवसीय- अन्ताराष्ट्रिय- शोधसङ्गोष्ठ्याः द्वितीये दिवसे व्याकरण-विभागीयसत्रम् 18.08.2026 तमे दिनाङ्के समायोजितम्। व्याकरणविभागेन 'वर्तमान- वैश्विक-भाषागतसमस्यानां वाङ्मयाधारित- समाधानानि' इति विषयमुररीकृत्य आयोजितायां सङ्गोष्ठ्यां सत्रद्वयमासीत्। प्रथमे सत्रे सत्राध्यक्षत्वेन डॉ. कामदेवझाः, सारस्वतातिथित्वेन च डॉ. दीपेशकतिरा आस्ताम्। अस्मिनह्रि एकादश शोधपत्रवाचकाः शोधपत्रम् अपाठिषुः। सत्राध्यक्षेण व्याकरणनिकाये स्फोटपरम्परायाः सैद्धान्तिकं प्रायोगिकञ्च पक्षमबलम्ब्य महत्त्वमवादीत्। डॉ. दीपेशवर्येण भाषासंरक्षणोपायाः, अनेकासु भाषासु विद्यमानानां संस्कृतदैनिकशब्दानां बाहुल्यम् इति उदाहरण- प्रत्युदाहरणैः स्पष्टीकृताः। सत्रस्य सञ्चालनं व्याकरणविभागाध्यक्षेण डॉ. विपिनकुमारेण अकारि। द्वितीये सत्रे सत्राध्यक्षत्वपदं डॉ. प्रियव्रतमिश्रः सारस्वतातिथित्वपदं डॉ. रामचन्द्रश्च व्यराजिष्टाम्। अमुष्मिन् सत्रे एकादश शोधपत्रप्रस्तोतारः स्वशोधपत्रवाचनमकार्षुः। सारस्वतातिथिना 'महाभाष्ये संवादसंस्कृतिः चिन्तन परम्परा चे'ति विषयमवलब्यं महाभाष्यस्थ-बहूनि लौकिकोदाहरणानि प्रदर्श्य तेषां सामाजिकोपयोगिता उपादेयता च अवारीत्। सत्राध्यक्षत्वेन महाभाष्यस्य सम्वादशैल्याः महत्त्वं व्यवारि। महाभाष्ये विषयाणां विस्फारणं सिद्धान्तानां प्रकटीकरणं तन्तुवायसम्वादः, व्याकरणे भाविनीसञ्ज्ञा, प्रत्यभिज्ञा, सर्वेषु सूत्रेषु किञ्चित् लौकिकं दृष्टान्तं प्रदर्श्य गूढगूढतरं विषयं सरसा तरसा च भाष्यकारेण प्रतिपादितमिति उदाहरणान्यनुसृत्य अब्रवीत्। सत्रसञ्चालनं डॉ. रेणूवत्सः अकार्षीत् धन्यवादज्ञापनञ्च डॉ. विपिनकुमारेण विहितम्। अस्मिन् पावनावसरे महाविद्यालयस्य सर्वेऽपि प्राध्यापकाः कर्मचारिणश्च समुपस्थिताः आसन्।

# संस्कृत-शिक्षण-सम्भाषण-शिबिरे गोस्वामितुलसीदास-जयन्ती-समारोहस्य आयोजनम्



**हिमसंस्कृतवार्ता, पाटलिपुत्रम् (पटना), २० राघव नाथ झा।** 'बिहार-संस्कृत-सञ्जीवन-समाज'-पक्षतः 'आधुनिको भव संस्कृतं वद' इत्याभियानस्य अन्तर्गतं वाक्यपदीयकार-महानीतिज्ञ-भर्तृहरि-स्मृति-संस्कृतशिक्षण-सम्भाषणशिबिरे अन्तर्जालीय-सन्तशिरोमणि-गोस्वामितुलसीदास-जयन्ती-समारोहस्य आयोजनं संस्कृतभाषायां कृतम्।

अभियानस्य प्रधानसंरक्षकः उत्तरप्रदेशशासनस्य भूतपूर्व-गृहसचिवः च डॉ. अनिलकुमारसिंहः अवदत् यत् सन्तशिरोमणिः गोस्वामितुलसीदासः 'सर्वे भवन्तु सुखिनः' तथा 'वसुधैव कुटुम्बकम्' इति सिद्धान्तं मन्यमानः महान् सन्तः आसीत्। तुलसीदासकृतं श्रीरामचरितमानसं भारतस्य राष्ट्रियग्रन्थरूपेण उद्घोषयितव्यम्। अभियानस्य राष्ट्रियाध्यक्षः 'बिहार-संस्कृत-सञ्जीवन-समाजस्य' महासचिवः च डॉ. मुकेशकुमारओझा अकथयत् यत् तुलसीदासस्य 'सियाराम मय सब जग जानी' इति एकया पङ्क्त्या एव तस्य विचाराः व्यक्ताः भवन्ति। सः संसारस्य सर्वान् जीवान् ईश्वररूपेण पश्यति स्म। राष्ट्रियसंयोजिका प्रो. रागिनीवर्मा अवदत् यत् तुलसीदासकृतस्य श्रीरामचरितमानसस्य अध्ययनं भारतस्य सर्वैः जनैः प्रतिदिनं करणीयम्। अभियानस्य उपाध्यक्षा डॉ. लीनाचौहान, राष्ट्रियकार्यकारिणीसदस्या डॉ. एकतावर्मा, बिहारप्रान्तस्य उपाध्यक्षा डॉ. दीप्तिकुमारी, बिहारप्रान्तस्य सहसंयोजिका डॉ. नीराकुमारी, अभियानस्य संरक्षकः डॉ. अनिलकुमारचौबे, पश्चिमवङ्गस्य सहसंयोजिका दयानीशारदेया, झारखण्डप्रान्तस्य सहसंयोजिका श्रीमती ज्ञानीशारदेया, मध्यप्रदेशप्रान्तस्य सहसंयोजिका ताराविश्वकर्मा, असमप्रान्तस्य सहसंयोजकः डॉ. विश्वजीतरुद्रपालः, आशीषकुमारः, बीजेन्द्रसिंहः, रीनासाहा, डॉ. रम्भाकुमारी, डॉ. डिम्पलसिंहः, वन्दनापटेरिया प्रभृतयः वक्तारः अपि गोस्वामितुलसीदासस्य व्यक्तित्वे कृतित्वे च विस्तारेण प्रकाशम् अडासयन् तथा च श्रीरामचरितमानसस्य अध्ययने बलं दत्तवन्तः।

धन्यवादज्ञापनं डॉ. लीनाचौहान महोदयया तथा ऐक्यमन्त्रः डॉ. नीराकुमारी महोदयया प्रस्तुतम्।

## तुलसीदासस्य साहित्यम् अद्यापि मानवीयमूल्यानां संवेदनाचानां च कृते प्रासङ्गिकम् – वी. एस. दूबे



हिमसंस्कृतवार्ता, पाटलिपुत्रम् (पटना), २० राघव नाथ झा। 'प्रज्ञा-समिति'-पक्षतः पाटलिपुत्रस्थे कालिदास-रङ्गालये अनसूया-प्रकोष्ठे सन्तशिरोमणेः गोस्वामितुलसीदासस्य जयन्ती-समारोहस्य भव्य म् आयोजनं कृतम्। कार्यक्रमस्य विधिवत् उद्घाटनं बिहार-झारखण्डयोः भूतपूर्वेण मुख्यसचिवेन श्रीविजयशङ्करदूबे-महोदयेन दीपप्रज्ज्वालनेन कृतम्। सः अवदत् यत् तुलसीदासस्य साहित्यम् अद्यापि मानवीयमूल्यानां संवेदनानाञ्च कृते प्रासङ्गिकं वर्तते। तुलसीदासस्य साहित्यस्य अध्ययनं समकालीनसन्दर्भैः सह कुर्वन्तु, तस्मिन् निहितानां मानवीयमूल्यानां वर्तमानसमाजेन सह संयोजनस्य प्रयासं च कुर्वन्तु। स्वकीये अध्यक्षीयभाषणे पाटलिपुत्रविश्वविद्यालयस्य साङ्ख्यिकीविभागस्य भूतपूर्वाध्यक्षः प्रज्ञासमित्याः च अध्यक्षः प्रो. अमरेन्द्रमिश्रः अवदत् यत् श्रीरामचरितमानसे अभिव्यक्ताः लोकमङ्गलस्य, समन्वयस्य, मर्यादायाः, करुणायाः, त्यागस्य, नैतिकतायाश्च मूलभूताः आदर्शाः अद्यतनसमयेऽपि तथैव महत्वपूर्णाः सन्ति। मुख्यातिथिरूपेण स्वविचारान् प्रकटयन् बिहारसर्वकारस्य भूतपूर्व-विशेषसचिवः डॉ. उपेन्द्रनाथपाण्डेयः अवदत् यत् तुलसीदासस्य साहित्यं मानवं स्वकर्तव्यैः, सामाजिकोत्तरदायित्वेन, मानवीयसंवेदनाभिः च संयोजयितुं कार्यं करोति। विशिष्टातिथिः डॉ. जङ्गबहादुरपाण्डेयः भरतस्य चरित्रे विस्तारेण प्रकाशम् अडासयत्।

कार्यक्रमे मङ्गलाचरणं राहुलकुमारपाण्डेयेन कृतम्। आगतानाम् अतिथीनां स्वागतं महासचिवः तरुणकुमारपाण्डेयः अकरोत्, धन्यवादज्ञापनञ्च डॉ. डी. एन्. तिवारी महोदयेन प्रस्तुतम्। मञ्चसञ्चालनं 'बिहार-संस्कृत-सञ्जीवन-समाज'-पाटलिपुत्रस्य महासचिवः संस्कृतविद्वांश्च डॉ. मुकेशकुमारओझा अकरोत्। डॉ. मुकेशकुमारओझा अवदत् यत् गोस्वामितुलसीदासस्य रचनासु व्यक्तान् व्यापकान् सामाजिकान्, सांस्कृतिकान्, मानवीयांश्च विचारान् अवगन्तुम् आवश्यकता वर्तते।

# UPSC-मुख्यपरीक्षा श्वः आरभ्यते, परीक्षाकेन्द्रे ८:३० वादनानन्तरं प्रवेशः न भविष्यति

**पाटलिपुत्रे २१ तः २३ पर्यन्तं तथा २९-३० अगस्त-दिनाङ्के पालिद्वये परीक्षा, अङ्गशोधनस्य (Frisking) मुख-प्रमाणीकरणस्य (Face Authentication) च भविष्यति व्यवस्था**

**हिमसंस्कृतवार्ता, पाटलिपुत्रम् (पटना), २० राघव नाथ झा।** सङ्घलोकसेवायोगस्य (UPSC) सिविलसेवा-मुख्यपरीक्षा २०२६ पाटलिपुत्रे २१ तः २३ अगस्त पर्यन्तं तथा २९, ३० अगस्त-दिनाङ्कयोः आयोजिता भविष्यति। परीक्षा बांकीपुर-राजकीय-कन्या-उच्चमाध्यमिक-विद्यालये पालिद्वये आयोज्यते। परीक्षां शान्तिमयीं, पारदर्शिनीं, कदाचारमुक्ताञ्च कर्तुं प्रमण्डलीयायुक्तः राजेशकुमारः गुरुवासरे सज्जतानां समीक्षां कृत्वा अधिकारिभ्यः आवश्यकान् निर्देशान् अददात्। आयुक्तः दण्डाधिकारिणः, मण्डलाधिकारिणः, केन्द्राधीक्षकान्, सम्बद्धान् अधिकारिणश्च UPSC-आयोगस्य सर्वेषां मार्गदर्शकानां पूर्णतया अनुपालनं कारयितुं निर्दिष्टवान्। परीक्षाकेन्द्रे जैमर-यन्त्राणां पर्याप्ता व्यवस्था स्थापनीया तेषां कार्यशीलतायाः नियमितपरीक्षणञ्च करणीयम् इति कथितम्।

**८:३० वादने तथा २:०० वादने पिहितं भविष्यति द्वारम्**

परीक्षा पालिद्वये आयोज्यते। प्रथमपाल्यै मुख्यद्वारं प्रातः ८:३० वादने, द्वितीयपाल्यै च मध्याह्ने २:०० वादने पिहितं भविष्यति। अभ्यर्थिनः निर्धारितसमयात् पूर्वमेव केन्द्रे सम्प्राप्य अन्वेषणप्रक्रियां समाप्य स्वस्थाने उपवेष्टव्याः।

परीक्षाकेन्द्रे दूरभाषयन्त्रं (Mobile phone), स्यूतं (Bag), छायाचित्रकम् (Camera), विद्युदुपकरणानि वा किमपि सञ्चारसाधनं आनेतुं अनुमतिः न भविष्यति। निरीक्षकाणां समीपे अपि दूरभाषयन्त्रम् अथवा अन्यानि सञ्चारसाधनानि न भविष्यन्ति।

महिला-पुरुष-अभ्यर्थिनां पृथक् अङ्गशोधनम्

केन्द्रे अभ्यर्थिनां सघनमङ्गशोधनं (Frisking) क्रियते। पुरुष-महिला-अभ्यर्थिनां परीक्षणार्थं क्रमशः पुरुष-महिला-आरक्षकाणां व्यवस्था भविष्यति। सर्वेषाम् अभ्यर्थिनां मुख-प्रमाणीकरणम् (Face Authentication) अपि विधास्यते।

घटिकातः आरभ्य पेयजलं यावत् व्यवस्था भविष्यति

आयुक्तः परीक्षामण्डपेषु पर्याप्तप्रकाशस्य, पेयजस्य, भित्तिघटिकायाः सहितानां सर्वेषाम् अत्यावश्यक-सुविधानां सुनिश्चयं कर्तुं निर्देशं दत्तवान्। सर्वेषु प्रकोष्ठेषु स्थिताः घटिकाः समानसमये एव संयोज्यन्ते। परीक्षाकेन्द्रे नियोजितस्य प्रत्येकस्य निरीक्षकस्य, अधिकारिणः, कर्मचारिणश्च समीपे वैधं राजकीयपरिचयपत्रं भवितुम् अनिवार्यम् अस्ति।

यातायात-नियन्त्रणाय विशेषव्यवस्था

परीक्षया सहिताः अभ्यर्थिनः केन्द्रं प्राप्तुं कष्टं न प्राप्नुयुः, एतदर्थं यातायातव्यवस्थां सुचारुरूपेण चालयितुं निर्देशः दत्तः। परीक्षायाः समग्रकाले आयुक्तकार्यालये नियन्त्रणकक्षः (Control Room) अपि कार्यरतः स्थास्यति। नियन्त्रणकक्षः : 0612-2219205, 2233578 आयुक्तः अवदत् यत् UPSC-सदृश्याः प्रतिष्ठितपरीक्षायाः सफलायोजने सर्वेषाम् अधिकारिणां कर्मचारिणाञ्च महती भूमिका अस्ति। सर्वे स्वकर्तव्यानि पूर्णनिष्ठया जागरूकतया च निर्वहेयुः, येन परीक्षा निष्पक्षा, पारदर्शिनी, कदाचारमुक्ते वातावरणे च सम्पन्ना भवेत्।

# बीएचयू-विश्वविद्यालये अष्टाविंशति-विभूतिभ्यः 'रामायणी-सम्मानः' प्रदत्तः





रामायण-साहित्ये, भारतीयसंस्कृतौ, राष्ट्रहिते च योगदानं दत्तवतीभ्यः प्रतिभाभ्यः सम्मानः अर्पितः

हिमसंस्कृतवार्ता, वाराणसी, २० राघव नाथ झा

गोस्वामितुलसीदासजयन्त्याः अवसरे रामायण-रिसर्च-काउन्सिल-पक्षतः काशिक-हिन्दू-विश्वविद्यालयस्य (BHU) भारत-अध्ययन-केन्द्रस्य सहयोगेन मालवीय-मूल्य-अनुशीलन-केन्द्रे 'रामायणी-सम्मान'-समारोहः आयोजितः। अस्मिन् समारोहे रामायणसाहित्यस्य, भारतीयसंस्कृतेः, अध्यात्मस्य, शोधस्य, सङ्गीतस्य तथा सामाजिकजागरणस्य क्षेत्रेषु उल्लेखनीयं योगदानं कृतवत्यः अष्टाविंशतिः (२८) विभूतयः संमानिताः। समारोहे शिक्षाविदः, सन्ताः, संसत्सदस्याः तथा विविधक्षेत्राणां प्रमुखाः गण्यमान्याः उपस्थिताः आसन्। काउन्सिल-संस्थया 'रामायणी-सम्मानम्' देशव्यापिनः अभियानस्य रूपं दत्त्वा प्रतिमण्डलं प्रापयितुं सङ्कल्पः गृहीतः। नूतनपीढीं रामायणसाहित्येन भारतीयसंस्कृत्या च योजयितुं समाजाय उत्कृष्टं कार्यं कुर्वतीनां प्रतिभानां प्रोत्साहनं चास्य मुख्यमुद्देश्यम् अस्ति।

## प्रतिमण्डले भविष्यति रामायणी-सम्मानः

नैनीताल-उधमसिंहनगरस्य संसत्सदस्यः तथा काउन्सिल-न्याससमित्याः अध्यक्षः अजयभट्टः अवदत् यत् समग्रे देशे ईदृशाः बहवः जनाः सन्ति, ये रामायणसाहित्यस्य, भारतीयसंस्कृतेः, राष्ट्रहितस्य च कृते महत्वपूर्णं कार्यं कुर्वन्ति। 'रामायणी-सम्मानस्य' माध्यमेन ईदृशाः प्रतिभाः समाजस्य पुरतः प्रेरणाप्रद-आदर्शरूपेण स्थापयिष्यन्ते।

छत्तीसगढ़स्य सरगुजामण्डलस्य संसत्सदस्यः चिन्तामणिमहाराजः अकथयत् यत् युवभ्यः आगामिपीढ्यै च समीचीनां दिशं दातुं प्रतिभानां प्रोत्साहनम् आवश्यकम् अस्ति। सः छत्तीसगढ़राज्येऽपि एतस्य सम्मानस्य आयोजनार्थं प्रयासं करिष्यति इति अवदत्।

भूतपूर्वः केन्द्रीयमन्त्री अश्विनीकुमारचौबे महोदयः अवदत् यत् काश्याः तुलसीदासजयन्त्याः च एतस्य अभियानस्य प्रारम्भः स्वयमेव महत्वपूर्णः अस्ति। सः देशस्य प्रत्येकस्मात् मण्डलात् रामायणाय, भारतीयसंस्कृतये, राष्ट्रहिताय च कार्यं कुर्वतीनां प्रतिभानां सम्माननाय अभियानस्य सञ्चालनं प्रति अवदत्।

## जीवने रामायणस्य आदर्शान् अङ्गीकर्तुं प्रेरणा

समारोहस्य अध्यक्षपदं भूषयन् BHU-कुलपतिः प्रो. अजितचतुर्वेदी अवदत् यत् 'रामायणी-सम्मानस्य' आयोजनं विश्वविद्यालयस्य कृते गौरवस्य विषयः वर्तते। सः रामायणस्य आदर्शान् जीवने पालयितुं प्रेरणाम् अयच्छत्।

BHU-भारत-अध्ययन-केन्द्रस्य समन्वयकः प्रो. शरदिन्दुकुमारतिवारी अतिथीनां स्वागतम् अकरोत्। कलासङ्कायस्य संकायप्रमुखः (डीन) प्रो. सुषमाघिल्डियालः अवदत् यत् BHU-संस्थानात् अस्य सम्मानस्य प्रारम्भः आनन्दप्रदः क्षणः अस्ति, अयं सम्मानः वैश्विकस्तरं यावत् प्राप्नुयात् इति काम्यते।

## अनूपजलोटामहोदयेन भजनेन जनाः मुग्धाः कृताः

संमानितासु विभूतिषु लोकप्रियः भजनसम्राट् पद्मश्री-अनूपजलोटामहोदयः अपि सम्मिलितः आसीत्। सः मञ्चात् भजनं प्रस्तूय उपस्थितानां मनांसि अमोहयत्।

रामायण-रिसर्च-काउन्सिल-संस्थायाः न्यासी सम्मानस्य च संयोजकः देवदत्तशर्मा (सेवानिवृत्तः IAS) सूचितवान् यत् अस्याः पहलस्य उद्देश्यं रामायणाधारितम् उत्कृष्टं योगदानं कुर्वतः व्यक्तयः संमान्य भारतीयसंस्कृतेः, अध्यात्मस्य, साहित्यस्य, सामाजिकजागरणस्य च कार्याणां प्रोत्साहनम् अस्ति।

काउन्सिलस्य प्रभारी तथा आध्यात्मिकगुरुः साध्वी प्रज्ञाभारती सीतामढ़ी-क्षेत्रे मातासीतायाः महालक्ष्मीस्वरूपेण स्थापनायाः तथा महिलाशक्तिकरायाः केन्द्ररूपेण क्षेत्रविकासस्य सङ्कल्पविषये विवरणं दत्तवती।

२८ विभूतिभ्यः सम्मानः 'रामायणी-सम्मानं' प्राप्तवत्सु अनूपजलोटा, अनुराधापौडवाल, आर.के.सिन्हा, किशोरकुणालः (मरणोपरान्तम्), डॉ. अर्चनाप्रकाशः, भगवानदासः, डॉ. उदयप्रतापसिंहः, डॉ. अवधीहरिः, योगेश्वरप्रसाददेवरानी, आदित्यजैनः, अभयमाणके, सन्तहरिओमः, नरेन्द्रनाथगगनः, योगेशचन्द्रशर्मा, सञ्जीवकुमारः, डॉ. आशाओझा, मदुगुल्लाप्रफुल्ला, विनोदकुमारतिवारी, डॉ. चन्द्रप्रभामदानः, आचार्यसन्तोषपाण्डेयः, अजययाज्ञिकः, विन्ध्याचलमणित्रिपाठी, राजराधेकृष्णशर्मा, प्रेमप्रकाशदुबे, त्रिलोकीनाथपाण्डेयः, रामभनीद्विवेदी, डॉ. रविशङ्करपाण्डेयः, रेखानेहरा च सम्मिलिताः सन्ति। डिजिटल-रामलीलातः सीतामढ़ी-परियोजनां यावत्

अजयभट्टः संस्थायाः विविधानां कार्याणां उल्लेखं कुर्वन् अवदत् यत् कोरोनाकाले देशव्यापिन्याः डिजिटल-रामलीलायाः आयोजनं कृतम् आसीत्। अयोध्यायां श्रीराममन्दिर-आन्दोलनम् आधृत्य 'श्रीरामलला—मन से मंदिर तक' इति ग्रन्थः निर्मितः तथा संस्कृतस्य प्रचारप्रसाराय 'रामायणवार्ता' इत्यस्याः प्रकाशनं क्रियते। सः असूचयत् यत् सीतामढ़ी-क्षेत्रे श्रीरामजानकी-स्थानार्थं १२ एकड् परिमिता भूमिः आबंटिता अस्ति। अत्र ५१ शक्तिपीठेभ्यः मृत्तिकां ज्योतिञ्च आनीय अखण्डज्योतेः स्थापना तथा चतुर्भुजा-महालक्ष्म्याः स्थापनायाः योजना अस्ति। प्राचीनमठस्य जीर्णोद्धारकार्यमपि प्रारब्धम् अस्ति।

# प्रत्येकस्य बिहारिणः लक्ष्यं भवेत्—बिहारं कथम् अग्रे नेयम्: श्रेयसी सिंह




बिहार-एसडीजी-सम्मेलने सततविकासेन 'विकसित-बिहार' इत्यस्मिन् विषये चिन्तनम्

हिमसंस्कृतवार्ता, पाटलिपुत्रम् (पटना), २० राघव नाथ झा। उद्योग-क्रीडामन्त्री श्रेयसी सिंह अकथयत् यत् प्रत्येकस्य बिहारिणः लक्ष्यं भवेत् यत् बिहारं कथम् अग्रे नेयम्। सामूहिकप्रयासेन एव सततविकासेन 'विकसित-बिहारस्य' स्वप्नः साकारः भविष्यति। सा गुरुवासरे अधिवेशनभवने आयोजिते 'बिहार-एसडीजी-सम्मेलनम्-२०२६' इत्यस्मिन् सम्बोधनं कुर्वती आसीत्। योजना-विकासविभागस्य यूनिसेफ-संस्थायाः च संयुक्ताश्रये आयोजितायाः द्विदिवसीय-सङ्गोष्ठ्याः उद्घाटनं मन्त्रिण्या दीपप्रज्ज्वालनेन कृतम्। अस्मिन् अवसरे एसडीजी-सम्बद्धायाः पुस्तकस्य विमोचनम्, अर्थ-साङ्ख्यिकी-निदेशालयस्य जालपुटस्य (Website) शुभारम्भः, डेटा-प्रयोगशालायाः (Data Lab) उद्घाटनञ्चापि कृतम्।

## समृद्ध-बिहारेण एव विकसित-भारतम्'

श्रेयसी सिंह अवदत् यत् यदा बिहारः समृद्धः भविष्यति, तदैव भारतं विकसितं भविष्यति। राज्ये महिलानां पुरोगमनाय निरन्तरं कार्यं प्रचलति, अस्य प्रभावश्च प्रत्येकस्मिन् क्षेत्रे दृश्यते। सा अकथयत् यत् आगामिषु दिनेषु बिहारे बृहदुद्योगानां स्थापनस्य दिशि अपि प्रयासाः निरन्तराः सन्ति। विकासयुक्तः मिहिरकुमारसिंहः अवदत् यत् गतेषु २० वर्षेषु बिहारे महद् परिवर्तनं जातम्।राज्यस्य ग्रामीणमार्गाः सुदृढाः जाताः, येन ग्रामाणां उत्पादाः नगराणि प्राप्नुवन्ति। क्रमशः... 10पृष्ठे

# महाकविविद्यापतिः मिथिलायाः आत्मा सनातनसंस्कृतेश्च अमरः संवाहकः- चौधरी



## प्रतिमास्थापनस्य द्विवर्षपूर्त्यवसरे मिथिला-सांस्कृतिक- परिषदा समर्पिता भावाञ्जलिः

हिमसंस्कृतवार्ताः:- बोकारो।नगरस्य सेक्टर-४ ई-स्थिते मिथिलाएकेडमी पब्लिक विद्यालयस्य परिसरे स्थापितायाः महाकविविद्यापतेः भव्यप्रतिमायाः द्विवर्षपूर्त्यवसरे मैथिलीभाषाभाषिणां प्रमुखसंस्था मिथिला- सांस्कृतिकपरिषदः पक्षतः भव्यः गरिमामयश्च पुष्पाञ्जलिसमारोहः आयोजितः। बुधवासरे सायंकाले आयोजिते अस्मिन् कार्यक्रमे समाजस्य गणमान्याः प्रबुद्धजनाः संस्थायाः पदाधिकारिणश्च महाकवेः प्रतिमायां श्रद्धासुमनांसि पुष्पाञ्जलिं च समर्प्य भक्तिभावेन तं प्रणमितवन्तः। अस्मिन् अवसरे सम्पूर्णं परिसरं विद्यापतेः अमरगीतैः 'जय मिथिला– जय मैथिली' इति घोषैश्च मुखरितम् अभवत्। कार्यक्रमस्य प्रारम्भे परिषदः महासचिवः नीरज चौधरी महाकविविद्यापतिं प्रणम्य कार्यक्रमस्य उद्देश्यम् उपादेयतां च प्रकाशयन् सर्वेषाम् आगन्तुकानां स्वागतं कृतवान्। परिषदः अध्यक्षः जयप्रकाशचौधरी उक्तवान् यत् मैथिलीसाहित्यस्य शिखरपुरुषः, भक्तिशृङ्गारयोः अद्वितीयः शब्दशिल्पी, 'मैथिलकोकिल' इति नाम्ना प्रसिद्धः महाकविविद्यापतिः केवलं युगद्रष्टा कविः न, अपि तु मिथिलायाः आत्मा सनातनसंस्कृतेश्च अमरः संवाहकः अस्ति। तस्य अमररचनाः शिवभक्तेः पावनपरम्परा च अद्यापि जनमानसं संस्कारयन्ति, आलोकयन्ति च।अन्येषु वक्तृषु निदेशक-मण्डलस्य संयोजकः तथा मिथिलाएकेडमी पब्लिक विद्यालयस्य अध्यक्षः राजेन्द्रकुमारः, परिषदः निदेशकमण्डलस्य सदस्याः कृष्णचन्द्रझा, विजयकुमारझा, विद्यालयस्य सचिवः दिलीपझा, उपाध्यक्षः बटोहीकुमारः च महाकविविद्यापतिम् अवतारी- महापुरुषरूपेण निरूपितवन्तः। वक्तारः अवदन् यत् विद्यापतेः अनन्यसाधनायाः भक्तेश्च प्रभावेन साक्षात् देवाधिदेवः महादेवः 'उगना' इति रूपेण तस्य सेवकरूपेण पृथिव्यां निवसति स्म। मैथिलीभाषायाः वैश्विकपटलस्थापनायां तस्य पदानां नचारीगीतानां च योगदानम् अतुलनीयम् अस्ति। तस्य रचनाः समाजाय प्रेम, समरसता, मर्यादा, अखण्डेश्वरभक्तिं च सन्दिशन्ति। एते सन्देशाः नवपीढ्यै मार्गदर्शकरूपेण भवन्ति। अस्मिन् क्रमे परिषदः सांस्कृतिककार्यक्रमनिदेशकः अरुणपाठकः तथा वरिष्ठरङ्गकर्मी विद्यालयस्य संयुक्तसचिवश्च सुनीलमोहनठाकुरः विद्यापतिना विरचितानि 'माधव कतें तोर करब बड़ाई...', 'उगना रे मोरा...' इत्यादीनि गीतानि मधुरस्वरेण प्रस्तुत्य उपस्थितानां मनांसि हृतवन्तौ। अयोध्यायाः अनन्तरं पुनौराधाम्नः विकासः सांस्कृतिकपुनर्जागरणस्य प्रतीकः। अस्मिन् अवसरे उपस्थितैः प्रबुद्धजनैः वर्तमानस्य सांस्कृतिकपुनर्जागरणस्य विषये विस्तरेण चर्चा कृता। अयोध्यायां प्रभुश्रीरामस्य भव्यस्य मन्दिरस्य निर्माणानन्तरं मातुः जानक्याः पावनप्राकट्यस्थली सीतामढी-स्थितस्य पुनौराधाम्नः केन्द्र-राज्यसर्वकाराभ्यां भव्यरूपेण विकासाय क्रियमाणां ऐतिहासिकयोजनां प्रति वक्तारः हर्षं सन्तोषं च प्रकटितवन्तः। वक्तारः अवदन् यत् मिथिलायाः अवधप्रदेशस्य च एषः पावनः सम्बन्धः सनातनचेतनायाः महत्त्वपूर्णः केन्द्रबिन्दुः अस्ति। पुनौराधाम्नः समग्रविकासेन सम्पूर्णस्य मिथिलाञ्चलस्य सांस्कृतिकगौरवं नूतनां वैश्विकीं प्रतिष्ठां प्राप्स्यति। कार्यक्रमस्य अन्ते सर्वैः स्वकीयां समृद्धां भाषिकां सांस्कृतिकां च धरोहरां संरक्षितुं तथा नवपीढीं मैथिलीभाषया महाकविविद्यापतेः विचारैश्च सम्बद्धां कर्तुं संकल्पः पुनरावर्तितः।अवसरे परिषदः उपाध्यक्षः श्रवणकुमारझा, मिथिलामहिलासमितेः अध्यक्षा पूनम्मिश्रा, मिथिलाएकेडमीस्य पूर्वसचिवः रवीन्द्रझा, ए. के. मिश्रः, अविनाशझा 'अवि', शम्भुझा, प्रदीपझा, गणेशझा, गोविन्दकुमारझा, दिलीपठाकुरः, गङ्गेशकुमार पाठकः, अरविन्दमिश्रः इत्यादयः गणमान्याः सहितं बहवः जनाः उपस्थिताः आसन्।

# बामेती-संस्थानात् प्रारब्धम् 'कृषि-जनकल्याण-संवाद-अभियानम्', प्रतिमण्डलं प्राप्स्यति अभियानम्



## कृषिसमृद्धौ, महिलोद्यमितायां, युव-रोजगारे, श्रमिकोत्थाने च भविष्यति मुख्यं ध्यानम्

हिमसंस्कृतवार्ता, पाटलिपुत्रम् (पटना), २० राघव नाथ झा

पाटलिपुत्रस्य बामेती-संस्थानात् गुरुवासरे 'कृषिसमृद्धिः, महिलोद्यमिता, युव-रोजगारः, श्रमिकोत्थानं तथा कृषि-जनकल्याण-संवाद-अभियानस्य' शुभारम्भः जातः। केन्द्रीय-कृषि-कृषककल्याण-तथा-ग्रामीणविकासमन्त्री शिवराजसिंहचौहानः अस्य अभियानस्य उद्घाटनम् अकरोत्। अस्य अभियानस्य अन्तर्गतं २२ अगस्त-दिनाङ्के गया-मण्डलात् मण्डलस्तरीयकार्यक्रमाणां शुभारम्भः भविष्यति, राज्यस्य सर्वाणि मण्डलानि प्रति च इदम् अभियानं नेष्यते।

अभियानावसरे केन्द्रीयकृषिमन्त्री कृषकैः अधिकारिभिः च सह प्रत्यक्षं संवादं करिष्यति। 'प्रकृति-प्रतिभयोः सम्मानं, राष्ट्र-समाजस्य उत्थानम्' इति सङ्कल्पनाम् आधृत्य अस्मिन् अभियाने आधुनिक-प्राकृतिक-स्थिरकृषेः, सस्यप्रबन्धनस्य, महिलासशक्तीकरणस्य, कृष्याधारितौद्यमितायाः, प्रसंस्करणस्य, मूल्यवर्धनस्य तथा कृषकाणां विपण्या सह उत्तमसंयोजनस्य विषयेषु विमर्शः भविष्यति।

'कृषकाः भगवत्स्वरूपाः सन्ति, अहञ्च तेषां सेवकः अस्मि' कार्यक्रमे शिवराजसिंहचौहानः अवदत् यत् पृथिव्यां यदि कश्चन भगवान् अस्ति तर्हि सः कृषकः एव, अहञ्च कृषकाणां सेवकः अस्मि। सः अकथयत् यत् लघूनां सीमान्तानां च कृषकाणां कृते अल्पभूमौ अधिकाधिक-आयस्य प्राप्तिः आवश्यकी वर्तते। एतदर्थम् एकीकृतकृषिप्रणाल्याः प्रोत्साहनं दीयते, येन कृषिः अधिका स्थिरा लाभप्रदा च भवितुं शक्नुयात्।

सः अवदत् यत् वर्धमानः कृषिव्ययः कृषकाणां पुरतः एका महती चुनौती अस्ति। रासायनिक-उर्वरकाणाम् अत्यधिकप्रयोगेण मृत्तिकायाः स्वास्थ्यमपि दुष्प्रभावितं भवति। ईदृश्यां स्थितौ कृषकेषु प्राकृतिककृषिविषये जागरूकतायाः वर्धनम् आवश्यकम् अस्ति। प्राकृतिककृष्या व्ययन्यूनतायां कृषकाणाम् आयवर्धने च साहाय्यं भवितुं शक्नोति।

प्रतिमण्डलं प्राप्स्यति जनकल्याणसंवादः

कृषिमन्त्री विजयकुमारसिंहः अवदत् यत् इदम् अभियानं पाटलिपुत्रस्य धरायाः प्रारभ्य बिहारस्य प्रतिमण्डलं प्राप्स्यति। अस्मिन् कृषकाणां, महिलानां, यूनां, श्रमिकाणां च सर्वेषां सहभागिता सुनिश्चिता भविष्यति। कृषिं जनकल्याणस्य प्रगतेः च आधारं विधाय बिहारस्य विकासाय नवीना गतिः प्रदास्यते।

ग्रामीणविकासमन्त्री श्रवणकुमारः अवदत् यत् बिहारे 'कृषि-रोड-मैप' इत्यस्य माध्यमेन कृषिक्षेत्रस्य विकासस्य सुदृढा आधारशिला स्थापिता अस्ति। कृषकाः नवीनप्रविधीन् स्वीकृत्य उत्पादनवर्धने महत्वपूर्णां भूमिकां निर्व्यूढवन्तः।

# पद्मविभूषण डॉ. आदित्यनाथझामहोदयस्य व्यक्तित्वं कृतित्वं च(जयन्तीविशेषः)





डॉ विमलेश झा,गंगौली, सरिसबपाही, मधुबनी, बिहार

भारतभूमिः प्राचीनकालादेव ज्ञानस्य, संस्कृतेः, प्रशासनस्य, लोकसेवायाः च पुण्यभूमिः अस्ति। अस्यां भूमौ समये समये बहवः महापुरुषाः अभवन्, ये स्वकीयेन ज्ञानबलेन, प्रतिभया, परिश्रमेण, कर्तव्यनिष्ठया च राष्ट्रस्य विकासे महत्त्वपूर्णं योगदानं दत्तवन्तः। आधुनिकभारतस्य इतिहासे एतादृशेषु विशिष्टेषु व्यक्तित्वेषु पद्मविभूषण-डॉ. आदित्यनाथझामहोदयस्य नाम अत्यन्तं गौरवेण स्मरणीयम् अस्ति। एषः एकः मेधावी विद्यार्थी, कुशलः प्रशासकः, बहुभाषाविद्, शिक्षाविद्, संस्कृतप्रेमी, संस्थाननिर्माता तथा राष्ट्रनिष्ठः लोकसेवकश्च आसीत्। एतस्य जीवनं बहुविधप्रतिभानां अद्भुतः समन्वयः आसीत्। एकस्मिन् पक्षे एषः भारतीयप्रशासनिकसेवायाः उच्चतमेषु पदेषु कार्यं कृतवान्, अपरस्मिन् पक्षे संस्कृतविद्यायाः संरक्षणसंवर्धनाय महत्त्वपूर्णं योगदानं दत्तवान्। अतः एतस्य जीवनचरितं केवलं एकस्य प्रशासकस्य जीवनचरितं नास्ति अपितु एतत् भारतीयप्रतिभायाः, संस्कृतानुरागस्य, आधुनिकशिक्षायाः, राष्ट्रसेवायाः तथा कर्तव्यपरायणतायाः प्रेरणादायिनी गाथा अस्ति।

एतस्य जन्म 1911 तमे वर्षे अगस्तमासस्य अष्टादशदिनांके बिहारराज्यस्य दरभंगामण्डलस्य सरिसबपाहीग्रामे अभवत्। एषः प्रसिद्धस्य संस्कृतविदुषः डा०सर गङ्गानाथझामहोदयस्य पुत्रः आसीत्। एतस्य भ्राता श्री अमरनाथझामहोदयः अपि आंग्ल-संस्कृतयोः विद्वान् आसीत् तथा इलाहाबादविश्वविद्यालयस्य पूर्वकुलपतित्वेन प्रसिद्धिं प्राप्तवान्। अतः आदित्यनाथझामहोदयस्य बाल्यकालः विद्यानुरागपूर्णे वातावरणे व्यतीतः अभवत्। परिवारे एव संस्कृतस्य, भारतीयपरम्परायाः, आधुनिकशिक्षायाः च संस्काराः तस्मिन् विकसिताः अभवन्। पारिवारिकविद्यापरम्परायाः प्रभावः एतस्य सम्पूर्णजीवने स्पष्टतया दृश्यते।

तस्य व्यक्तित्वस्य महत्त्वपूर्णं वैशिष्ट्यम् आसीत् यत् एषः परम्परां सम्मानयन् आधुनिकताम् अपि पूर्णतया स्वीकृतवान्। संस्कृतविद्यायां गहनानुरागः तथा आधुनिकप्रशासनिकशिक्षा—एतयोः समन्वयः एतस्य जीवनस्य मूलस्वरूपम् आसीत्। एषः बाल्यकालादेव अत्यन्तं प्रतिभाशाली छात्रः आसीत्। तस्य शिक्षाजीवनस्य विकासे वाराणसी तथा प्रयाग इत्येतयोः महत्त्वपूर्णा भूमिका आसीत्। आधुनिकशिक्षया सह एतेन भारतीयज्ञानपरम्परायाः अपि अध्ययनं कृतम्। तदनन्तरम् उच्चशिक्षायै एषः इलाहाबादविश्वविद्यालयं गतवान्। तत्र अध्ययनं कुर्वन् एतेन स्वकीया प्रतिभा प्रदर्शिता। अंग्रेजी तथा संस्कृतयोः एतस्य गहनम् अध्ययनम् आसीत्। विधिशास्त्रे तथा प्रशासनसम्बद्धविषयेषु अपि एतस्य रुचिः आसीत्। भारतस्य पारम्परिकविद्यायाः तथा पाश्चात्त्यआधुनिकज्ञानस्य एषः समन्वयः एतस्य भावीप्रशासनिकजीवनस्य आधारभूतः अभवत्।

डॉ. आदित्यनाथझामहोदयस्य जीवनस्य महत्त्वपूर्णचरणं भारतीयप्रशासनिकसेवायां प्रवेशः आसीत्। 1936 तमे वर्षे सितम्बरमासस्य षोडशदिनांके एतेन भारतीयप्रशासनिकसेवायां प्रवेशः कृतः। तस्मिन् समये भारतीयप्रशासनिकसेवा अत्यन्तं प्रतिष्ठिता तथा कठिनपरीक्षाप्रधानः प्रशासनिकमार्गः आसीत्।

एतादृशे क्षेत्रे प्रवेशः एतस्य असाधारणमेधायाः, परिश्रमस्य तथा दृढसङ्कल्पस्य प्रमाणम् आसीत्। सेवायां प्रवेशानन्तरं एषः संयुक्तप्रान्ते सहायकदण्डाधिकारी जिलाधिकारीत्यादिषु च पदेषु कार्यं कृतवान्। क्षेत्रीयप्रशासनस्य माध्यमेन एतेन सामान्यजनस्य जीवनं, समस्याः, प्रशासनिकव्यवस्थायाः वास्तविक-स्वरूपस्य अवलोकनं कृतवान्। प्रशासनिकसेवायां कार्यं कुर्वन् एषः न केवलं कार्यालयीयनियमपालनं न कृतवान्, अपितु जनहितमेव प्रशासनस्य मूलाधाररूपेण स्वीकृतवान्। एतस्य कार्यशैली अनुशासनपूर्णा, विवेकयुक्ता तथा कर्तव्यप्रधाना च आसीत्। 1939 तमे वर्षे नवम्बरमासे भारतीयसिविलसेवायाः एकः महत्त्वपूर्णः अधिकारी भूत्वा एषः भारतीयराजनीतिक सेवायां स्थानान्तरितः अभवत्। भारतीयराजनीतिकसेवायाः अन्तर्गतं एतस्य कार्यक्षेत्रं विस्तृतम् अभवत्। तत्कालीनभारते अनेकानि देशीयराज्यानि आसन्। तेषां प्रशासनिकसम्बन्धानां, शासनव्यवस्थानां तथा ब्रिटिशभारतेन सह सम्बन्धानां संचालनाय वरिष्ठाधिकारिणाम् आवश्यकता आसीत्।

स्वतन्त्रतायाः समये एषः पूर्वीयराज्यानां निवासीसचिवरूपेण कार्यं कृतवान्। अस्मिन् दायित्वे एतस्य कूटनीतिकबुद्धिः, प्रशासनिकानुभवः तथा समन्वयक्षमता विशेषरूपेण जनाः दृष्टवन्तः। विविधराज्येषु कार्यरतः एषः भारतस्य सामाजिक-सांस्कृतिकविविधतां अवगन्तुं समर्थः अभवत्। 1947 तमे वर्षे भारतं स्वतन्त्रं जातम्। स्वतन्त्रतायाः अनन्तरं देशस्य सम्मुखे नूतनाः समस्याः उपस्थिताः अभवन्। तासु प्रशासनिकव्यवस्थायाः पुनर्गठनम्, देशीयराज्यानां एकीकरणम्, आर्थिकविकासः, सामाजिकव्यवस्थायाः पुनर्निर्माणम् तथा नूतनलोकतान्त्रिकसंस्थासु विश्वासस्य निर्माणम् इत्यादीनि कार्याणि प्रमुखानि आसन्।

डॉ. आदित्यनाथझामहोदयस्य दीर्घः प्रशासनिकानुभवः अस्मिन् समये अत्यन्तम् उपयोगी अभवत्। स्वतन्त्रभारतस्य प्रशासनव्यवस्थायां एतेन अनेकानि महत्त्वपूर्णानि कार्याणि कृतानि। एतस्य व्यक्तित्वस्य विशेषता आसीत् यत् एषः परिवर्तनशीलसमयस्य आवश्यकतां शीघ्रं अवगच्छति स्म। औपनिवेशिकप्रशासनव्यवस्थायाः अनुभवस्य उपयोगं कुर्वन् एषः स्वतन्त्रभारतस्य लोककल्याणकारीप्रशासनव्यवस्थायाः निर्माणे योगदानं दत्तवान्। स्वतन्त्रतायाः अनन्तरं भारतीयप्रशासनिकसेवायाः अधिकारिणां प्रशिक्षणस्य आवश्यकता अभवत्। नूतनभारतस्य प्रशासनिकाधिकारिणः न केवलं नियमज्ञानसम्पन्नाः भवेयुः, अपितु तेषु राष्ट्रसेवाभावः, नेतृत्वक्षमता, नैतिकता, निर्णयशक्तिः तथा लोककल्याणदृष्टिः अपि भवेत्—एतादृशः प्रशिक्षणदृष्टिकोणः आवश्यकः आसीत्। डॉ. आदित्यनाथझामहोदयः मसूरीस्थस्य राष्ट्रीयप्रशासनिक-अकादम्याः प्रथमः निदेशकः अभवत्। एतत् एतस्य जीवनस्य अत्यन्तं महत्त्वपूर्णं योगदानम् अस्ति। प्रथमनिदेशकत्वेन एतस्य दायित्वं केवलं कार्यालयस्य संचालनं नासीत्। नूतनप्रशिक्षण-संस्थायाः शैक्षिकदिशा, प्रशिक्षणपद्धतिः, प्रशासनिकमूल्यानि तथा अधिकारीणां व्यक्तित्वविकासः—एतेषां सर्वेषां निर्माणे एतस्य भूमिका आसीत्। एतस्य दृष्टौ प्रशासनिकाधिकारी राष्ट्रस्य सेवकः अस्ति। अतः अधिकारीणां प्रशिक्षणे कर्तव्यनिष्ठा, सत्यनिष्ठा, अनुशासनम् तथा जनसेवाभावः आवश्यकः इति एषः मन्यते स्म। मसूरीस्थस्य अस्य प्रशासनिकप्रशिक्षणकेन्द्रस्य भावीविकासे एतस्य प्रारम्भिकनेतृत्वस्य महत्त्वपूर्णः प्रभावः अभवत्। एतत् कार्यं दर्शयति यत् डॉ. झामहोदयः केवलं सफलः प्रशासकः नासीत्, सः सफलः संस्थाननिर्माता अपि आसीत्। डॉ. आदित्यनाथझामहोदयस्य कृतित्वस्य सर्वाधिकं गौरवपूर्णेषु अध्यायेषु वाराणस्यां स्थापितस्य वाराणसेय-संस्कृतविश्वविद्यालयस्य प्रथमकुलपतित्वम् अस्ति। संस्कृतभाषा भारतीयसंस्कृतेः तथा ज्ञानपरम्परायाः प्रमुखा संवाहिका अस्ति। वेदाः, उपनिषदः, रामायणम्, महाभारतम्, पुराणानि, दर्शनशास्त्राणि, व्याकरणम्, काव्यशास्त्रम्, न्यायः, मीमांसा, वेदान्तः, आयुर्वेदः, ज्योतिषम् इत्यादीनां विशालः ज्ञानभाण्डारः संस्कृते एव सुरक्षितः अस्ति। स्वतन्त्रतायाः अनन्तरं संस्कृतस्य उच्चशिक्षायै आधुनिकविश्व-विद्यालयीयसंस्थायाः आवश्यकता अनुभूता। वाराणस्यां स्थापितः वाराणसेय-संस्कृतविश्वविद्यालयः अस्याः आवश्यकतायाः पूर्तये महत्त्वपूर्णं सोपानम् आसीत्। डॉ. आदित्यनाथझामहोदयः अस्य नवस्थापितस्य विश्वविद्यालयस्य प्रथमः कुलपतिः अभवत्। एकः आधुनिकः प्रशासकः, भारतीयसिविलसेवायाः अधिकारी तथा बहुभाषाविद् भूत्वा संस्कृतविश्वविद्यालयस्य नेतृत्वं स्वीकृतवान् इति एतस्य संस्कृतानुरागस्य सशक्तं प्रमाणम् अस्ति।

कुलपतिरूपेण एतेन संस्कृतशिक्षायाः संस्थागतविकासस्य आधारः दृढीकृतः। पारम्परिक-संस्कृताध्ययनस्य आधुनिकविश्वविद्यालयीयव्यवस्थया सह समन्वयः एतस्य प्रमुखेषु उद्देश्येषु अन्यतमः आसीत्। एतस्य नेतृत्वे संस्कृतविश्वविद्यालयस्य विकासाय अनुकूलं वातावरणं निर्मितम् अभवत्। संस्कृतं केवलं धार्मिकभाषा वा प्राचीनभाषा न, अपितु ज्ञानस्य, दर्शनस्य, साहित्यस्य तथा वैज्ञानिकचिन्तनस्य भाषा इति भावः एतेन सुदृढः कृतः। अद्यापि संस्कृतविश्वविद्यालयस्य विशालः शैक्षिकपरिवारः तस्य प्रारम्भिकदृष्टेः स्मरणं करोति। संस्कृतशिक्षाक्षेत्रे तस्य योगदानं भारतीयसंस्कृतिसेवारूपेण सदैव स्मरणीयम् अस्ति। डॉ. आदित्यनाथझामहोदयस्य प्रशासनिकजीवनस्य अन्यत् महत्त्वपूर्णं पदं दिल्लीस्य प्रथमोप-राज्यपालपदम् आसीत्। नवगठितदिल्लीप्रदेशस्य प्रथमः उपराज्यपालः भूत्वा एतेन राजधान्याः प्रशासनिकव्यवस्थायाः प्रारम्भिकसंरचनायां महत्त्वपूर्णं योगदानं दत्तम्।

# पद्मविभूषण डॉ. आदित्यनाथझा-

## राजधान्याः प्रशासनिकव्यवस्थायाः सुदृढीकरणम्

**क्रमशः....**

नूतनपदस्य प्रथमाधिकारीरूपेण एतस्य समक्षं अनेकानि दायित्वानि आसन्।
राजधान्याः प्रशासनिकव्यवस्थायाः सुदृढीकरणम्, केन्द्रसर्वकारेण सह समन्वयः, जनसुविधानां विकासः, सार्वजनिकव्यवस्थायाः संरक्षणम् तथा तीव्रगत्या विकसितमानस्य नगरस्य आवश्यकतानां पूर्तिः—एतानि एतस्य कार्यस्य प्रमुखाः पक्षाः आसन्। प्रथमः उपराज्यपालः भवितुं केवलं प्रशासनिकप्रतिष्ठा पर्याप्ता नासीत्। तत्र अनुभवः, धैर्यम्, निर्णयशक्तिः, समन्वयकौशलं तथा दूरदर्शिता आवश्यकाः आसन्। डॉ. झामहोदयः एतान् सर्वान् गुणान् स्वकीयेन कार्येण प्रदर्शितवान्।
संस्कृतं प्रति एतस्य अनुरागः विशेषरूपेण उल्लेखनीयः। एषः संस्कृतस्य महत्त्वं केवलं अतीतस्य अवशेषरूपेण न मन्यते स्म। एतस्य दृष्टौ संस्कृतभाषा भारतीयचिन्तनस्य मूलभाषा अस्ति, यस्यां भारतस्य सहस्रवर्षीयज्ञानपरम्परा निहिता अस्ति। डॉ. आदित्यनाथझामहोदयस्य राष्ट्रसेवां, प्रशासनिकयोगदानं तथा सार्वजनिकजीवनस्य उत्कृष्टतां च दृष्ट्वा भारतसर्वकारेण तस्मै पद्मविभूषणसम्मानं प्रदत्तम्। इदं सम्मानम् एतस्य दीर्घकालीनराष्ट्रसेवायाः राष्ट्रियस्वीकृतिरासीत्।
पद्मविभूषणं भारतस्य प्रमुखेषु नागरिकसम्मानेषु अन्यतमम् अस्ति। इदं सम्मानं केवलं एतस्य व्यक्तिगतगौरवस्य विषयः नासीत्, अपितु बिहारस्य, मिथिलायाः, संस्कृतजगतः तथा भारतीयप्रशासनिकपरम्परायाः अपि गौरवम् आसीत्।
डॉ. आदित्यनाथझामहोदयस्य पारिवारिकजीवनस्य उल्लेखः अपि एतस्य व्यक्तित्वस्य मानवीयपक्षं प्रकाशयति। एतस्य पत्नी श्रीमती आभा झा मिथिलायाः विदुषी महिला आसीत्। विद्वत्परम्परायाः वातावरणे एतस्य पारिवारिकजीवनं संस्कारसम्पन्नम् आसीत्। एतस्य जीवनं दर्शयति यत् महान् प्रशासकः भवितुं केवलं बाह्यप्रतिष्ठा पर्याप्ता नास्ति। पारिवारिकसंस्काराः, विद्यानुरागः, आत्मानुशासनम् तथा सामाजिकदायित्वबोधः अपि व्यक्तित्वनिर्माणे महत्त्वपूर्णां भूमिकां वहन्ति। डॉ. आदित्यनाथझामहोदयस्य निधनं 1972 तमे वर्षे जनवरीमासस्य अष्टादशदिनांके अभवत्। यद्यपि भौतिकरूपेण एषः अस्माकं मध्ये नास्ति, तथापि एतस्य कार्याणि अद्यापि जीवितानि सन्ति।
इत्थं वयं वक्तुं शक्नुमो यत् पद्मविभूषण-डॉ. आदित्यनाथझामहोदयः आधुनिकभारतस्य बहुमुखप्रतिभासम्पन्नेषु महापुरुषेषु अन्यतमः आसीत्। एतस्य व्यक्तित्वे विद्या, प्रतिभा, परिश्रमः, अनुशासनम्, कर्तव्यनिष्ठा, प्रशासनिकदक्षता, संस्कृतानुरागः तथा राष्ट्रसेवा एते सर्वे गुणाः विशिष्टरूपेण समन्विताः आसन्।
अतः डॉ. आदित्यनाथझामहोदयस्य जीवनं विद्यार्थिभिः, शिक्षकैः, प्रशासकैः तथा राष्ट्रसेवायां समर्पितैः सर्वैः जनैः अनुकरणीयम् अस्ति। एतस्य कृतित्वं भारतीयप्रशासनस्य इतिहासे, संस्कृतशिक्षायाः विकासे तथा राष्ट्रसेवायाः परम्परायां च चिरकालं यावत् स्मरणीयं भविष्यति। डॉ. आदित्यनाथझामहोदयस्य यशः अक्षयम् अस्तु, एतस्य राष्ट्रसेवायाः आदर्शः भावीसेवकानां कृते प्रेरणास्रोतः भवतु । जयन्तीमभिलक्ष्य वयं एतेभ्यः महामानवेभ्यः प्रणामांजलिं समर्पयामः।अन्ते च -कीर्तिर्यस्य स जीवति।।इत्यलम्।।

डॉ.विमलेशः.



# वार्तासंवादः

**हिमसंस्कृतवार्ताः, ईदरधीररजः**

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
काव्या- नमस्ते नन्दिनि। अद्य काश्चन विचित्राः वार्ताः श्रुताः मया। झारखण्ड-राज्ये कश्चन वानरः क्षौरशालां प्रविष्टवान् अस्ति। तत्र तेन दर्पणस्य पुरतः उपविश्य स्वस्य रूपं दृष्टम्।
नन्दिनी- अहो कौतुकम्! वानरः अपि स्वसौन्दर्यं चिन्तितवान् अस्ति! अपरा वार्ता अपि अतीव विस्मयकरी। आकाशयाने एकेन यात्रिकेण हृदाघातः अनुभूतः। परन्तु तस्मिन् एव विमाने पञ्चदश-हृदयवैद्यैः यात्रा कृता। तैः वैद्यैः तस्य प्राणरक्षणं कृतम्।
काव्या- दैवानुकूल्यम् एव तत्! वैद्यैः सम्यक् कार्यं कृतम्। चीनदेशस्य वार्ता श्रुता वा त्वया? तत्र एकया संस्थया कश्चन यन्त्रमानवः निर्मितः। सः यन्त्रमानवः द्वि-मान-परिमितम् ऊर्ध्वं कूर्दितवान् अस्ति।
नन्दिनी- आश्चर्यम्! यन्त्रमानवेन अपि एतादृशं कूर्दनं कृतम्! मया अपि एका अन्या वार्ता पठिता। एकेन यात्रिकेण एकचक्रिकया एकादश- सहस्र-क्रोशमिता यात्रा आरब्धा। तेन केरलतः नेपालदेशं प्रति गमनं निश्चितम्।
काव्या- अहो साहसं तस्य! एकया एव चक्रिकया तावती दीर्घा यात्रा आरब्धा! सत्यम् एव, जगति अतीव विचित्राः घटनाः दृष्टाः अस्माभिः।

# संस्कृतं मधुरं सदा- ६४

(मुक्तिसाधनम्)

ऋषिभिः कथितं यत् समर्पणस्य वास्तविकार्थस्य अवगमानन्तरं हि समर्पणं सफलीभवति इति। निश्चितरूपेण एतस्य परिणामो हि आत्मसमर्पणं नाम। एतादृशं ज्ञानं असकृत् कृतस्य विचारस्य एवम् अनुशीलनस्य अनन्तरं हि सम्भवति। मनसा, वचसा तथा कर्मणा कृतं समर्पणम् एवं ज्ञानम् इत्यनयोर्मध्ये भेदो नास्ति। समर्पणं तदा हि सम्पूर्णं भवितुमर्हेत् यदा मनः सन्देहरहितं स्यात्। नायं वाणिज्यिकः इव विषयः। भगवत्तो नात्र कस्यापि वस्तुनो याचना कर्तुं शक्या। एतादृशे समर्पणे तु आत्मनि सर्वं समाहितं भवेत्। तदेव ज्ञानं वैराग्यं वा, भक्तिः प्रेम वा इति।
केनापि उपायेन अहङ्कारः, ममता चेति अनयोः निर्मूलीकरणं हि मुक्तिः नाम। एतयोः द्वयोः परस्परम् एकम् अपरस्य आश्रयेण तिष्ठति । तस्मात् एकस्य नाशः, अपरस्य नाशस्य कारणं भवति। वाङ्मनसाभ्याम् अगोचर्याः एतादृश्याः मनोदशायाः प्राप्त्यर्थम् अनयोः मार्गयोः एकतरो मार्गो हि पर्याप्तः अस्ति। यदि अन्तःकरणात् अहङ्कारः उत्पाट्यते तर्हि ज्ञानमार्गः सुलभः स्यात्, तद्वत् यदि ममता उत्पाट्यते तर्हि भक्तिमार्गः प्रशस्तो भवेत्। भक्तिमार्गस्य, ज्ञानमार्गस्य च परिणामः समानः। अस्मिन् विषये शङ्कायाः न किमपि कारणं स्यादिति शुभम्

**हिमसंस्कृतवार्ताः, नारदोपाध्यायः, असम**

# पाटलिपुत्र-ग्रीनफील्ड-

## टाउनशिप-क्षेत्रे भूमेः क्रय-विक्रययोः प्रतिबन्धः निवारितः



हिमसंस्कृतवार्ता, पाटलिपुत्रम् (पटना), २० राघव नाथ झा पाटलिपुत्र-ग्रीनफील्ड-उपग्रहनगरक्षेत्रे भूमेः क्रय-विक्रययोः हस्तान्तरणस्य च पूर्वप्रवृत्तः प्रतिबन्धः अधुना प्रभावी नास्ति। नगरविकास-आवासविभागस्य मन्त्री नीतीशमिश्रः एताम् सूचनां दत्तवान्। मन्त्रिणा सूचितं यत् अस्मिन् विषये विभागेन पाटलिपुत्रस्य समाहर्तुः-सह-मण्डलनिबन्धकस्य कृते आवश्यकी सूचना प्रेषिता। विकासयोजना-प्रारूपस्य प्रकाशनानन्तरं विभागीयविज्ञप्तिं प्रसार्य टाउनशिप-विशेषक्षेत्रे भूमेः क्रय-विक्रय-हस्तान्तरणेषु आरोपितः प्रतिबन्धः निवारितः। सः स्पष्टीकृतवान् यत् पाटलिपुत्र-ग्रीनफील्ड-उपग्रहनगरस्य समग्रक्षेत्रे (मुख्यक्षेत्रेणापि सह) अधुना भूमेः क्रय-विक्रये हस्तान्तरणे वा कोऽपि प्रतिबन्धः प्रभावी नास्ति। मन्त्रिणा उक्तं यत् मुख्यमन्त्रिणः सम्राट्-चौधरी-महोदयस्य नेतृत्वे सर्वकारः विकासेन सह जनहिताय सर्वोच्चां प्राथमिकतां ददाति। विकासकार्येषु कस्यापि जनस्य हितं न बाधितं भवेत्, अस्य विशेषं ध्यानं धार्यते। भू-हस्तान्तरणप्रतिबन्धस्य समापनेन क्षेत्रस्य भूस्वामिनां सामान्यनागरिकाणां च मध्ये स्थिता सन्देहस्थितिः समाप्ता भविष्यति, भूमेः क्रय-विक्रयविषये च तेभ्यः स्पष्टता प्राप्स्यते।

## प्रत्येकस्य बिहारिणः...

राज्यस्य ग्रामीणमार्गाः सुदृढाः जाताः, येन ग्रामाणां उत्पादाः तीव्रगत्या नगराणि प्राप्नुवन्ति। द्रुतमार्गाणां (Expressway), मार्ग-रेलजालस्य च विस्तारेण सह ग्रामेषु विद्युत्स्थितौ अपि महती प्रगतिः जाता। भारतसर्वकारस्य ईएसी-पीएम (EAC-PM) सदस्या प्रो. शमिकाविः अवदत् यत् विकसितबिहारं विना विकसितभारतस्य परिकल्पना असम्भवा अस्ति। सा बिहारस्य आर्थिकप्रगतेः ग्रामीण-शहरीक्षेत्रेषु वर्धमानानाम् आर्थिकगतिविधीनाञ्च उल्लेखम् अकरोत्।

### एसडीजी-अङ्कः ४८ तः ५७ पर्यन्तं संवर्धितः

योजना-विकासविभागस्य अपरमुख्यसचिवा डॉ. एन्. विजयलक्ष्मी अकथयत् यत् मण्डलानां विकासे मण्डलायुक्तानां (DM) उपविकास-आयुक्तानां (DDC) च भूमिका महत्वपूर्णा वर्तते। केन्द्रस्य 'विकसितभारतम्-२०४७' इत्यस्य लक्ष्यदिशि 'विकसितबिहारम्-२०३७' इति लक्ष्यस्य प्राप्तिः आवश्यकी अस्ति। सा असूचयत् यत् बिहारस्य समग्रः एसडीजी-अङ्कः २०१८-१९ वर्षस्य ४८ अङ्कतः वर्धित्वा ५७ जातः। राज्येन एकादशसु (११) सततविकासलक्ष्येषु सुधारः पञ्जीकृतः। बिहारः षट्सु लक्ष्येषु—स्वास्थ्यं कल्याणञ्च, स्वच्छजलं स्वच्छता च, स्वच्छा ऊर्जा, उत्तरदायी-उपभोगः उत्पादनञ्च, स्थलीय-पारिस्थितिकी तथा शान्तिः, न्यायः, सशक्तसंस्थाश्च—'अग्रणी' (Frontrunner) श्रेण्याम् अस्ति। स्वच्छजलस्य स्वच्छतायाश्च क्षेत्रे बिहारेण ९८ अङ्काः प्राप्ताः।




# !!देहलीपुराधिदेवतां च कालिकां भजे!!

प्राप्नुवन्ति मानवाः स्वकामनाप्रपूर्तये,
दूर-दूरतश्च देवि! त्वत्कटाक्षलब्धये।
श्रूयतेऽसि भक्तकामदा सदैव कालिके!,
देहि जीविकां नमामि देहलीपुराधिपे!।।१

लोकपालिकासि कालिका कथं स्वकं सुतम्?,
क्रन्दितं शृणोषि नो पुनः पुनः पदाश्रितम्।
कर्त्तुमर्हसीह जीविकां त्वमेव कालिके!,
देहि जीविकां भजामि देहलीपुराधिपे!।।२

कर्णयोश्च दीनवाक्यमालिकां धरेः शुभे!
वाञ्छितं फलं प्रदेहि वृत्तिदायिके! प्रभे!।
वृत्तिदानमस्तु मेऽत्र वृत्तिनामधारिके!
जीविकां प्रदेहि देवि! देहलीपुराधिपे!।।३

ब्रह्मविष्णुशङ्करैः त्वदग्रतोऽभियाच्यते,
भाग्यमेव देवि! मे मयापि तद् विधीयते।
देहि देहि देवि! कालिके! कथं न दीयते,
जीविकां प्रदेहि हे सुताय भक्तवत्सले!।।४

चिन्तयामि ते पदाम्बुजं सदैव मानसे,
कालिकेऽत्र पक्ववृत्तिहीनमेनमुद्धरेः।
वृत्तिभीतिहारिके! निवेदनं पदेऽस्ति ते,
देहि जीविकां शिवं करोतु जीवनं शिवे!।।५

यामि नो स्वदुःखसम्प्रकाशने जने जने,
साम्प्रतं त्वदन्तिके भणामि देवि! वृत्तिके!
तुच्छजीवनेऽधिकं न किञ्चिदत्र काम्यते,
देहि सर्वकारजीविकां हि देवि! कालिके।।६

वृत्तिमर्जयन्ति ते धनेश्वराः धनेन वै,
चाटुवाक्यवाचकाः वचोभिः पुष्पितैश्च तैः।
वैभवं न मेऽस्ति चाटुवाक्यमालिकास्ति मे,
दासमङ्गलप्रदायिकेऽद्य मां समुद्धरेः।।७

पौरुषे कृतेऽपि केन जीविका न लभ्यते,
जीवनं शनैः शनैः प्रयाति भद्रकालिके!।
पुण्यनाम ते मया दिवानिशं प्रजप्यते,
शुद्धसत्त्वरूपिकेऽद्य जीविकां प्रदेहि मे।।८

सर्वकारवृत्तिहीनता जनं प्रबाधते,
माननेन किं भवेत् प्रदेहि वृत्तिमद्य मे।
मन्दिरं प्रयामि वृत्तिहेतुरेव कालिके!
देहि देहि जीविकां च देहलीपुराधिपे! ९

हे मदिष्टदेवतेऽम्ब! देहलीपुराधिपे!
दृष्टिरन्यथा करोषि दासकात् कथं शिवे!।
सारहीनमस्ति जीवनं भृशं पदादृते,
देहि शासनस्य जीविकां च भद्रकालिके।।१०

हार्दकथ्यमत्र वेदनाभृतं निवेद्यते,
यामि ते पदं विहाय कुत्र ब्रूहि कालिके!।
देवि! वेत्सि मामकं सुकाङ्क्षितं प्रपूरयेः,
सिद्धिदे! महेशि! हे दयस्व वृत्तिमद्य मे ।।११

श्रूयतां सुतस्य वेदनीयमत्र कालिके!
दर्श्यतां सुतेऽनुकम्पनं च भद्रकालिके!।
दिश्यतां सुताय योग्यवृत्तिरेव चण्डिके!
दीयतां समर्हजीविकां सुभद्रकालिके।।१२

हिमकाव्यामृतम्

काञ्चनं न कामिनीकुलं मयाभियाच्यते,
शासने पदं समर्हणीयमर्थयामि हे!।
विश्वपाठशालकेषु शिक्षकत्वमस्तु मे,
स्यदिदं सुसाधितं च सत्वरं सुकालिके!।।१३

दिव्यबोधसाधिके! प्रभीषणे! करालिके!
कालधारिकेऽतिघोरचण्डिके! कपालिके!।
लम्बजिह्वबाह्यदर्शिके! नृमुण्डमालिके!
कल्पतां मदीयवृत्तिरक्षतां निवेद्यते।।१४

क्वाक्षरे स्थले शुभे विराजसे न दृश्यसे,
सर्वगाऽसि सर्वदासि सर्वरूपधारिके!।
त्वर्पये सपादवारुणीप्रकूपिकाञ्च ते
देहि योग्यजीविकां च वृत्तिजीविनेऽत्र मे।।१५

धर्मधामकालिकालये च देहलीस्थिते,
कामनाः भवन्ति पूरिताः जनैः प्रकथ्यते।
पुष्पनिम्बनारिकेलहस्तकस्य चापि मे,
प्रार्थना निशम्यतां च देहलीपुराधिपे!।।१६

रक्ष मन्निवेदनं च वृत्तिकामानां ब्रुवे,
कालिकां विना गतिर्न चोन्नतिः स्वजीवने।
वृत्तिरन्वितं स्वदासकं विधेहि कालिके!
वृत्तिमातनोतु देवि! देहलीपुराधिपे! ।।१७

काङ्क्षिता चिराय योग्यवृत्तिरस्ति कालिके!
वेत्सि मद्दशां कृपां कुरुष्व भद्रकालिके!
वृत्तिवर्जितस्य योग्यवृत्तिसङ्कटं हरेः,
देहलीपुराधिदेवते! शृणुष्व कालिके!१८

भाविचिन्तया नयामि नक्तमत्र कालिके!
नैककार्यसंरतः दिनं नयामि चाम्बिके!।
हृत्तले त्वनागतं भयं सदा विजृम्भते,
अश्रुहीनरोदनं प्रपश्य भद्रकालिके! ।।१९

यद्यपीह शिक्षितोऽस्मि पत्रकाणि सन्ति मे,
योग्यवृत्तिद्वारमस्ति केन रोधितं शिवे!।
जीविकाश्रिया सुखं प्रदेहि वृत्तिदायिके!
योग्यवृत्तये नियोज्यतां च भद्रकालिके!।।२०

शङ्खमन्त्रघोषवाद्यमङ्गलानि तानि ते,
मन्दिरे पुरः नदन्ति सर्वदापि कालिके!।
मामकीह चित्तवृत्तिरस्ति ते पदाम्बुजे,
दासकाय योग्यवृत्तिमातनोतु कालिके!।।२१

क्षुन्निवृत्तिकारिके! सुवृत्तिसम्प्रदायिके!
जीविकां विना तु साधनापि नैव शक्यते।
वृत्तिकामिनं स्वकीयपुत्रकं निभालयेः,
जीवनाय जीविकां प्रदेहि मानवर्धिके!।।२२

अन्यदीयदेवसंश्रयं न यामि कालिके!
साधयामि भद्रकालिकां कथं न साध्यसे?।
वेपथुश्च जायते वपुस्त्वदीयदर्शने,
योग्यजीविकां प्रदेहि तन्मयाभियाच्यते।।२३

वैक्लवं विहाय यत्यते समर्हवृत्तये,
प्रत्ययोऽस्ति दुःखवारिधिं तरामि कालिके!
पुत्रकमुपेक्ष्य किं सुखं विभाति मातृके!
देहि योग्यजीविकां परं पदं न काङ्क्ष्यते।।२४

वृत्तिबाधिते कुटुम्बभारभारिते सुते,
वृत्तिमव्ययीकुरुष्व शीघ्रमेव कालिके!।
क्षेमदायिकासि वृत्तिवृष्टिकारिके शिवे!
देहि वृत्तिवैभवं च देहलीपुराधिपे!।।२५
क्रमशः ........

इति श्रीयुवराजभट्टराईकृतं देहलीपुराधिपायाः कालिकायाः वृत्तिप्राप्तिस्तोत्रं श्रीकालिकायै समर्पितम् अस्तु

**डॉ. युवराज भट्टराई**



# "संस्कृत कथा मञ्जरी"

## ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।

## "अथ भानुमती कथा"

विशालायां नगर्यां नन्दी नाम राजा महाशौर्यसम्पन्नोऽभूत्। निजभुजबलेन सर्वान् प्रत्यर्थिनृपतीन् पादपद्मोपजीविनो विधाय एकच्छत्रेण राज्यं करोति स्म । तस्य राज्ञः जयपालो नाम पुत्रः षड्विधदण्डाऽऽयुधसाधनाभिज्ञो मन्त्री बहुश्रुतो नाम, भार्या च भानुमती नाम आसीत्। सा राज्ञोऽतिप्रिया, भूपतिः सर्वदा तस्याम् अनुरक्तः सुरतसुखम् अनुभवन् तिष्ठति स्म। यदा सिंहासने उपविशति तदा अर्धासने भानुमतीमुपविशयति, क्षणमपि तस्या वियोगं न सहते।
एकदा मन्त्रिणा मनसि विचारितम्, "अयं राजा निर्लज्जो भूत्वा सभामध्ये सिंहासने स्त्रियमुपवेशयति, सर्वेऽपि जनास्तां पश्यति, महदनुचितमेतत्; यः कामी स उचितानुचितं न जानाति।" इति सचिन्त्य एकदाऽवसरं प्राप्य राजानामब्रवीत्- भो राजन्! किञ्चित् विज्ञाप्यमस्ति। राज्ञोक्तं- किं तत् ब्रूहि। मन्त्रिणोक्तं- यत् भानुमती सभामध्ये अर्धासने उपविशति, तन्महद्नुचितं भवति, 'असूर्यम्पश्या राजदाराः' इति शास्त्रकारवचनम्। अत्र नानाविधो जनः समागत्य तां पश्यति।
राज्ञोक्तं- सर्वमयि जानामि, किं करोमि? मम महती प्रीतिः अस्याम् इमां विहाय क्षणमपि स्थातुं न शक्नोमि। मन्त्रिणोक्तं- तर्हेवं क्रियताम्। राज्ञोक्तं- किं तन्निरुप्यताम्। तनोक्तं- चित्रकारमाहूय तेन पटस्योपरि भानुमत्या रूपं लेखयित्वा, पुरःस्थिते भित्तिप्रदेशे सङ्कट्य तस्याः स्वरूपं द्रष्टव्यम्। तद्वचनं राज्ञः चित्ते लग्नम्।
ततो राजा चित्रकारमाहूयोक्तवान्- भो चित्रकार! भानुमत्या रूपं चित्रे लेखनीयम्।चित्रकारिणोक्तं- भो देव! अहं तस्या रूपं प्रथमं प्रत्यक्षं विलोक्य, पश्चात् यथाऽवयवं विलिखिष्यामि। तच्छ्रुत्वा राज्ञा भानुमती आकारिता, तस्मै दर्शिता च। स तु तां विलोक्य, पद्मिनी स्त्री इयमिति विज्ञाय। एवमुक्तलक्षणयुक्तं तस्याः रूपं लिखित्वा राज्ञे हस्ते समर्पितवान्। राजाऽपि तत्र चित्रलिखितां तां दृष्ट्वा अतिसंतुष्टस्तस्मै चित्रकाराय उचितं ददौ। तदनन्तरं शारदानन्देन राजगुरुणा चित्रपटलिखितां भानुमतीं दृष्ट्वा चित्रकारं प्रति भणितं- भो चित्रकार! भानुमत्याः सर्वं लक्षणं लिखितं, परमेकं विस्मृतं त्वया। तेनोक्तं- भो स्वामिन्! किं विस्मृतं कथय। शारदानन्देनोक्तं- तस्याः वामजघनस्थले मत्स्याकारः तिलकः अस्ति, स न लिखितस्त्वया। राजाऽपि शारदान्दवचनं श्रुत्वा, तत्प्रत्यनिरीक्षणार्थं यावतसुरतसमये तस्याः वामजघनं पश्यति, तावत् मत्स्याकारः तिलको दृष्टः। तं दृष्ट्वा राजा स्वमनसि अचिन्तयत्, कथमस्याः गुप्तदेशे स्थितं तिलकं दृष्टवान्? सर्वथाऽनया अस्य संसर्गो विद्यते! अन्यथा कथमेतदनेन ज्ञातम्? स्त्रीणां विषये पापसन्देहः कर्तव्य एव। इत्येवं विचार्य्य मन्त्रिणामाहूय पूर्ववृत्तान्तमकथयत्। मन्त्रिणाऽपि तत्समये तच्चित्तानुकूलं यथा, तथा भणितम्- भो भो राजन्! कस्य चेतः कीदृग्विधमस्ति, तत् केन ज्ञायते? सर्वथा सत्यं भवितुमर्हत्ययं वृत्तान्तः। राज्ञा भणितं- भो मन्त्रिन्! मम त्वं प्रियः तर्हि तम शारदानन्दं मारय। मन्त्रिणाऽपि तथाऽस्तु इति उक्त्वा लोकानां पुरतो धृतः शारदान्दो। तस्मिन् अवसरे शारदान्देन भणितम्- अहो! राज्ञां न कोऽपि प्रियो भवतीति लोकोक्तिः सत्या। राज्ञा यस्मै क्रुध्यति स शुचरपि अशुचर्भवति।
मन्त्रिणा स्वमनसि विचारितम्- अहो! एतत् सत्यं वा मिथ्या वा, किमर्थं ब्राह्मणवधः क्रियते? महदनुचितमेतत् इति शारदान्दमन्यैः अज्ञातं ह्यन्तर्भवन नीत्वा, भूगर्भे निक्षिप्य, राजानं प्रत्यागत्य मन्त्रिणा भणितं- भो राजन्! अनुष्ठिता तवाज्ञा। राज्ञा 'साधु कृतम्' इति भणितम्।

**डा. वर्षा प्रकाश टोणगांवकर पुणे, महाराष्ट्रम्**